श्रीः

कौषीतकिब्राह्मणोपनिषत्

['वाङ्मे मनसि—' इति शान्तिः]

हरिः ओम् । चित्रो ह वै गार्ग्यायणिर्यक्ष्यमाण आरुणिं वव्रे ॥

श्रीमते रामानुजाय नमः

[येनोपनिषदां भाष्यं रामानुजमतानुगम् ।
रम्यं कृतं प्रपद्ये तं रङ्गरामानुजं मुनिम् ॥]

श्रीमद्रङ्गरामानुजमुनीन्द्रानुगृहीता

कौषीतक्युपनिषत्प्रकाशिका

अतसीगुच्छसच्छायमञ्चितोरस्स्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥
व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
कौषीतकि(की)श्रुतिव्याख्या करवाणि यथामति ॥

अर्चिरादिगतितत्प्राप्यदेशविशेषतद्विशिष्टब्रह्मानुभवप्रकारोपदेशाय

श्रीः

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः

कौषीतक्युपनिषद्भाष्यपरिष्कारः

विद्वद्भिश्चन्द्रमासीरपि विदितमतैः सेव्यपर्यङ्करूपः
प्राणादौ यस्य मूले घटयितुमुचितश्चेन्द्रमुख्यान्तरात्मा ।
धाम स्वापादिरन्तुः एतनिखिलजगद् यो हि कौषीतकीष्टः
श्रीमान् श्रीवेदमार्गेश्वर इह वितनोत्वञ्जसैव श्रियं नः ॥

कौषीतकिब्राह्मणोपनिषदि चतुरध्याय्यां प्रथमेऽध्याये पर्यङ्क-

स ह पुत्रं श्वेतकेतुं प्रजिघाय, याजयेति.॥ २ ॥

तं हासीनं पप्रच्छ, गौतमस्य पुत्र! अस्ति संवृतं लोके यस्मिन् मा धास्यस्यन्यमहो वाऽध्वा तस्य [यस्मिन्?] लोके धास्यसीति ॥३॥

स होवाच, नाहमेतत् वेद, हन्ताचार्यं पृच्छानीति। स ह

आख्यायिकेयमारभ्यते **चित्रो ह....यज्ञे**। नाम्ना चित्र. गार्ग्यस्यापत्यं **गार्ग्यायणिः** क्षत्रिय. आरुणिं गौतमं याजनाय प्रार्थितवानित्यर्थः ॥१

स...याजयेति। स तु श्वेतकेतुनामानं पुत्रम्, त्वमेव गत्वा याजयेति प्राहिणोत् = प्रेषितवानित्यर्थ· ॥ २ ॥

त....धास्यसीति। हे गौतमपुत्र! यस्मिन् लोके मा वा अन्यं वा यज्ञाद्यनुष्ठापनेन स्थापयिष्यसि, तस्मिन् लोके रहस्यमुपदेश्यं किञ्चिदस्ति किम्? यस्मिन् लोके मां स्थापयिष्यसि, स्थापयितुमिच्छसि, तस्याध्वा वा कश्चिदस्ति किमित्यर्थ ॥ ३ ॥

विद्या प्रस्तूयते। सेयं परमपदे पर्यङ्के समुपासीनस्य भगवतो वासुदेवस्य ध्यानरूपा। तामिमां प्रस्तोष्यता प्रथमतः चन्द्रं प्राप्तैरपि पूर्वानुष्ठितविद्यैः परमपदं सुखलभ्यमिति कयाचिदाख्यायिकया प्रदर्श्यते। तत्र चित्रनामा क्षत्रियः स्वयं पर्यङ्कविद्यावित् मुमुक्षुर्यष्टुं प्रवृत्ते। याजकस्तु ब्राह्मणः यागेनानेन अयं चन्द्रमण्डलं प्राप्य भोगान् अनुभूय पुनर्निवर्तिष्यते यथालोकमित्येव मेने। यतः स न विजज्ञौ काम्यकर्मकरतेभ्यो ऽन्येभ्योऽस्य यष्टुर्विशेषम्। तदेव क्षत्रियः याजकस्य यथार्थस्थितबुद्धिपूर्वकमनुष्ठापकत्वे सत्येव कर्मसादुगुण्यं मन्वानः याजकमागतं रहस्यमर्थं पप्रच्छ, अथ चाविदुषे तद्रहस्यमुपदिदेशेत्युच्यते चित्र इत्यादिना। भक्त्या सह काम्यस्य, मुक्त्या भुक्तेश्च समाहरणादयमन्वर्थनामा चित्रः। (१)

अन्यमहोवाऽध्वा इत्यत्र अहो इत्येतत् आहो इत्येतदर्थकम्।

पितरमासाद्य पप्रच्छ ॥ ४ ॥

इति ह माऽप्राक्षीत्; कथं प्रतिब्रवाणीति ॥ ५ ॥

स होवाच, अहमप्येतन्न वेद। सदस्येव वय स्वाध्यायमधीत्य हरामहे यन्नः परे ददति; एह्युभौ गमिष्याव इति ॥ ६ ॥

स ह समित्पाणिश्चित्रं गार्ग्यायणिं प्रतिचक्रमे, उपायानीति ॥

तं होवाच—ब्रह्मार्घ्योऽसि गौतम! यो न मानमुपागाः। एहि व्येव त्वा ज्ञपयिष्यामीति ॥ ८ ॥

स...पप्रच्छ। स्पष्टोऽर्थः ॥

इति ह...प्रतिब्रवाणीति। इतीत्येतत् उक्तार्थप्रकारवचनम्। एवंप्रकारेण मा पृष्टवान् कथमस्योत्तरं ददामीति ॥ (४-५) ॥

स ह गमिष्याव इति अहमपि न जाने। गुरु रहसि गत्वा रहस्यान् अर्थान् [अप्] पृष्ट्वा सदस्येव स्वाध्यायमधीत्य परे यजमानाय यत् द्रव्यं होतव्यमिति प्रयच्छन्ति, तत् जुहुम। अस्माक रहस्यार्थपर्यन्त-ज्ञानं नास्ति। त्वमप्यागच्छ। आवाभ्यां गत्वा स प्रष्टव्य इत्यर्थः ॥६॥

स...उपायानीति। समिद्धारहस्तस्सन् चित्रनाम्न क्षत्रियस्य समीप, शिष्यस्सन् उपगच्छामीति प्रवृत्ते ॥ ७ ॥

तं ज्ञापयिष्यामीति। यस्त्वमभिमान नोपागाः=त्यक्ता-भिमान एव सन् शिष्योऽहमित्यागतोऽसि, स त्वं ब्रह्मार्घोऽसि। ब्रह्म-त्वेन=ब्राह्मणत्वेन अर्घ्योऽसि पूज्योऽसि। ब्राह्मणस्त्वं क्षत्रियेण मया

संवृतं किञ्चिदस्ति आहो न; अन्यो वा कश्चिदस्ति, अहो नेत्यर्थः। यद्वा अहो इत्याश्चर्ये। तत्र लोके किञ्चित् रहस्यमस्ति, अहो अत्याश्चर्यं तत्। तत् किं ज्ञायते, अन्या वा किं ज्ञायत इति प्रश्नार्थः।   (३)

स होवाच—ये वै के चास्माल्लोकात् प्रयन्ति, चन्द्रमसमेव ते सर्वे गच्छन्ति ॥ ९ ॥

उपनीय शिष्यमार्वं प्रापयितुमयोग्यः । तूष्णीमेवाऽऽयाहि, त्वां ब्रह्म विज्ञापयिष्यामि इति ॥ ८ ॥

स ह...गच्छन्तीति । ये केचन इष्टापूर्तादिकारिणः विद्वांसश्च, ते सर्वे चन्द्रमसं गच्छन्तीत्यर्थः । इयांस्तु विशेषः—इष्टादिकारिणस्तु धूमरात्र्यपरपक्षदक्षिणायनपितृलोकाकाशक्रमेण चन्द्रमसमायान्ति । विद्वांसस्तु अर्चिर्दिनपूर्वपक्षोदगयनसंवत्सरवायुलोकादित्यक्रमेण चन्द्रमसमुपयान्तीति ।

इदञ्च वाक्यं तृतीयाध्याये वैराग्यपादे चिन्तितम् । तत्र हि—"अनिष्टादिकारिणामपि च श्रुतम्" । 'ये वै के चास्माल्लोकात् प्रयन्ति

---

९. यत्र लोके धास्यसि तत्र रहस्यं जानासि किमिति पृष्टवानयं राजा, धास्यसीति पदं प्रयुञ्जानः, 'त्वं स्थापयितुं तत्रेच्छसि । अहं तु न तत्र स्थास्यामि' इति सूचयतीव । तदयं, किं, सर्वेषामिष्टापूर्तादिकारिणामिव स्वात्मनोऽपि चन्द्रमण्डलगमनं संमन्यते, आहो नेति गौतमः संदिदेह । तत्र राज्ञा स्पष्टमुत्तरं दत्तम्, 'ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' इति । इष्टापूर्तादिकारिणां मध्ये केचिद् गच्छन्ति, मादृशा न गच्छन्तीति न । सर्वेऽपीष्टादिकारिणो गच्छन्त्येवेत्यर्थः । अत्र पूर्वं यागस्य प्रस्तुतत्वात्, तस्य लोकविशेषफलाभार्थतायाः 'यस्मिन् लोके धास्यसि' इत्यवगमितत्वात् लोकार्थमिष्टादिकारिणो ये, त एव सर्वे इति पदेन प्रकरणवशाद् गृह्यन्ते । न तु इष्टादिकारिव्यतिरिक्तानामप्यविशेषाद् ग्रहणम् । कतिपयेष्टादिकारिपुरुषाग्रहणशङ्कापरिहारार्थतया सर्वपदस्यार्थवत्त्वात् । अर्चिरादिमार्गगामिनामिव अन्येषामपि इष्टादिकारिव्यति-

चन्द्रमसमेव ते सर्वे गच्छन्ती'त्यविशेषश्रवणात् इष्टादिकारिणामिव अनिष्टादिकारिणामपि चन्द्रप्राप्तिरस्त्येवेत्यर्थः । तर्हि सुकृतकारिणां दुष्कृतकारिणाञ्च चन्द्रप्राप्तिसत्त्वे, को विशेष इत्यत्राह "संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्" । तुशब्दः शङ्कां व्यावर्तयति । संयमने = यमशासने सति इतरेषाम् अनिष्टादिकारिणां यमयातनाः अनुभूय चन्द्रारोहावरोहौ । 'अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे' इति अनिष्टादिकारिणां यमवश्यतादर्शनात् । "स्मरन्ति च" । 'सर्वे चैते वशं यान्ति यमस्य भगवन् किल' इति यमवश्यतास्मरणात् । 'अपि सप्त' पापकृतां गन्तव्यत्वेन रौरवादीन् सप्त नरकानपि स्मरन्ति । ननु सप्तसु लोकेषु गच्छतां कथं यमसदनप्राप्तिः ? तत्राह — "तत्रापि तद्व्यापारादविरोधः" । तेष्वपि सप्तसु यमाज्ञयैव गमनादविरोधः । अत्र अनिष्टादिकारिणामपि यमलोकं प्राप्य स्वकर्मानुरूपं यातनाश्चानुभूय पश्चात् चन्द्रारोहावरोहौ स्तः ।

रिकाणां चन्द्रमण्डलारोहावरोहाभावाच्च । अयमर्थः अनिष्टादिकार्यधिकरणेऽपि निरुङ्कितः । तथाच श्रीभाष्यम्, "सर्वे गच्छन्तीत्येतदपि वचनम्, ये इष्टादिकारिणः ते सर्वे इति परिणेयम्" इति । परब्रह्मोपनिषद्भाष्ये, ये केचन इष्टापूर्तादिकारिणो विद्वांसश्च ते सर्वे चन्द्रमसं गच्छन्तीति विदुषामपि सर्वपदेन ग्रहणेनार्थवर्णनम्, मतान्तरस्य यत्किञ्चिदस्य विदुषोऽपि अविद्वद्रूपेष्टादिकारिण इव सर्वपदेन ग्रहणमस्तीत्याशयेनेति द्रष्टव्यम् । इष्टादिकारिभिन्नस्य विदुषोऽपि सर्वपदग्राह्यत्वे श्रीभाष्याभिमते तु 'विद्याकर्मणोरिति तु, प्रकृतत्वात्' इति सूत्रस्य, 'विद्यायाः कर्मणश्च फलभूता चन्द्रलोकप्राप्तिः नानिष्टादिकारिणो भवति' इत्येवार्थो भावयितव्यः स्यादिति ध्येयम् ।

इति प्राप्ते उच्यते—"विद्याकर्मणोरिति तु प्रकृतत्वात्"। तु शब्दः शङ्कानिवृत्त्यर्थः। देवयानपितृयाणे हि फलभूते विद्याकर्मणोरित्यवसीयते। 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति,' 'अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते, ते धूममभिसंभवन्ति' इति विद्याकर्मणी प्रकृत्य हि देवयानपितृयाणे आम्नायेते। अतो विद्याकर्मविधुरेष्वनिष्टादिकारिषु देवयानपितृयाणासंभवात् न चन्द्रप्राप्तिः। 'ये वै केचास्माल्लोकात् प्रयन्ति' इति वचनम् इष्टादिकारिसर्वविषयं नेतव्यम्।

अत्रेदं बोध्यम्—उपरि, 'तेषां प्राणैः पूर्वपक्ष आप्यायते' इति वाक्ये तेषामिति इष्टादिकारिणामेव ग्रहणम्। न तु तद्विद्यानां विदुषाम्; तेषामर्चिरादिमार्गे चन्द्रप्राप्तिसत्त्वेऽपि चन्द्रस्य तदा तदधीनवृद्ध्यभावात्। स्वर्गानुभवार्थं गच्छतामेव सोमराजभावस्य प्रामाणिकत्वात्। विदुषां तु आतिवाहिकान्तरैरिव चन्द्रेणापि सोपचारं स्वस्थानादतिवहनमात्रम्; न तु तत्र सर्वथा स्थापनादि। एवञ्च तत्पूर्ववाक्येऽपि ते सर्वे इति इष्टादिकारिमात्रग्रहणमेव युक्तम्। ननु तर्हि इष्टादिकारिषु केषांचित् चन्द्रेण विसृज्यमानत्वमर्चिरादिगमनञ्च कथ्यमानं कथं घटत इति चेत्—उच्यते। अत्रेष्टादिकारी विद्वान् अविद्वांश्चेति द्विविधः। अविद्वानिव विद्वानपि कश्चित् चन्द्रमण्डले भोगं कश्चित् कालमनुबुभूषुरिष्टादिकार्यपि भवति चेत्, स तद्भोगावसाने चन्द्रेण पृष्टवता मोक्षायातिसृज्यत इति। तत्रायं कर्मफलस्यानुभूतत्वात् विद्याफलानुभवायार्चिरादिमार्गं प्रविशति। न त्वयमर्चिरादिद्वारा प्राक् चन्द्रमण्डलं प्राप्तः। चन्द्रप्राप्तेर्विद्याफलत्वे हि अर्चिरादिमुखेन सा स्यात्। इष्टिफल-

न वनिष्टादिकारिणा चन्द्रप्राप्त्यभावे पञ्चमाहुत्यसम्भवात् शरीरारम्भ एव नोपपद्यते । तत्राह "न तृतीये तथोपलब्धे" । 'तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानम्' इति तृतीयस्थानशब्दितानामनिष्टादिकारिणा क्षुद्रजन्तूनां न पञ्चमाहुत्यपेक्षा । तथा ह्युपलभ्यते, 'तेनासौ लोको न सम्पूर्यते' इति । तृतीयस्थानेन हि (?) असौ चन्द्रलोको न प्राप्यत इति हि तदर्थः । "स्मर्यतेऽपि च लोके" । केषाञ्चित् पुण्यकर्मणामपि द्रौपदीधृष्टद्युम्नप्रभृतीनां पञ्चमाहुत्यनपेक्षयैव देहारम्भो भारतादिषु स्मर्यते । "दर्शनाच्च" । "तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति आण्डजं जीवजम् उद्भिज्जम्" इति श्रुत्युपात्ताण्डजजीवजोद्भिज्जलक्षणभूत-

---

त्वात्तु धूमादिमार्गेण चन्द्रगमनमेव युक्तम् । तत्र भोगानुभवात् पश्चादेवार्चिरादिगमनम् । तदेवोच्यते, 'स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति' इत्यादिना । न च तर्हि, यथाकर्म यथाविद्यं तमागतं पृच्छति' इति विद्याफलतया चन्द्रगमनवर्णनं कथं घटत इति वाच्यम्—तस्य वाक्यस्य विद्याफलत्वप्रतिपादने तात्पर्याभावात्, केवलकर्मी विद्वांश्च स्वकृतेष्टादिक्रियानुसारेण यः आगच्छति तमित्यत्रैव तात्पर्यमित्येषा निरूपणसरणिः । अन्या तु–धूमादिमार्गेणेव अर्चिरादिमार्गेणापि चन्द्रगमनसद्भावात् तदेव यथाकर्म यथाविद्यमिति विवक्षितम् । एवञ्च ते सर्वे गच्छन्तीत्येतत् इष्टादिकारिविषयं विद्वद्विषयमपि । ततश्च चन्द्रगमनमिदं विद्याफलभूतमेव । न चैवमर्चिरादिमार्गेण प्राप्तचन्द्रस्य पुनः, 'अग्निलोकमागच्छति' इत्यादिना आदितो गमनवर्णनं कथं घटत इति वाच्यम्—तस्य वाक्यस्य चन्द्रप्राप्त्यनन्तरमर्चिरादिगतेरादित प्रातिवर्णने तात्पर्याभावात्, केवल-

जाति (त !) मध्ये केषाञ्चिदुद्भिज्जानां वृक्षादीनां पञ्चमाहुत्यनपेक्षा लोके दृष्टा । ननु, 'तेषां खल्वेषां भूतानां त्रीण्येव' इत्यवधारणं नोपपद्यते । स्वेदजानामत्रानुपात्तत्वात् । तत्राह—"तृतीयशब्दावरोधः संशोकजस्य" । संशोकजस्य = स्वेदजस्यापि 'आण्डजं उद्भिज्जम्' इत्यत्र तृतीयेनोद्भिज्जशब्देनावरोधः = संग्रहो विद्यत इत्यर्थः । अतः केवलपाप-

---

मर्चिरादिमार्गसत्तामात्रे तात्पर्यात् । यथा तत्र वायुलोकवरुणलोकादीनामत्र स्थितः क्रमः अविवक्षितः, तथा चन्द्रलोकप्राप्त्यनन्तरमग्निलोकगमनवर्णनमप्यविवक्षितमेव । इष्टिविशेषं कृत्वा विद्यामनुतिष्ठन् चन्द्रमस्संवादक्रममपि करिष्यमाणं गतिमिव चिन्तयन्नास्त यः, स यथाकर्म यथाविद्यं विद्याफलतया अर्चिरादिमार्ग-*प्रवेशमेव प्रथमं प्राप्य चन्द्रं प्राप्नोति । स चातिसृज्यत इति ।* तृतीया तु—चन्द्रमस्संवादचिन्तासद्भावात् विद्याकर्मोभयफलतया अर्चिरादिमुखेनैव चन्द्रप्राप्तिरस्तु । अवश्यगन्तव्यमार्गमध्यगतस्य मार्गान्तरेण गमनकल्पने गौरवाच्च । अथापि ते सर्वे इत्यत्र श्रीभाष्य-*स्वारस्यात् इष्टादिकारिव्यतिरिक्तस्य विदुषोऽनिष्टादिकारिण इवा*-ग्रहणमेवेति । अत्र अधिकरणसारावलिश्लोकोऽप्यनुसंधानमर्हति—

पूर्वं धूमादिमार्गे सुकृतिषु कथिता चन्द्रमःप्राप्तिरन्या
सायुज्यं न्यासविद्याप्रकरणपठितं चान्द्रमन्याद्युक्तम् ।
अन्याऽत्रार्चिर्मुखानामतिवहनरतामण्डमस्याप्तिरिन्दोः
इत्थं सुस्था व्यवस्था प्रणिहितहृदयैरेवमन्यच्च सूह्यम् ॥ (५०८)

इति । अत्र चतुर्थपादान्ते प्रणिहितहृदयैरित्यादिकं नूनं प्रकृतकौषीतक्युक्तचन्द्रमस्संवादाभिप्रायेणेवेति ज्ञायते । पूर्वदर्शितत्रिविधचन्द्रप्राप्तिप्रकारवत् अयं चतुर्थोऽपि प्रकारः इष्टिसहकृतविद्याफलभूतः, यः खलु न्यासविद्याप्रकरणपठितवत् न दक्षिणायनमृतमात्र-

तेषा प्राणै पूर्वपक्ष आप्यायते । तानपरपक्षेण प्रजनयति ॥ १० ॥

कर्मणा चन्द्रप्राप्तिर्न भवतीति स्थितम् । प्रकृतमनुसराम ॥

तेषां...प्रजनयति । तेषाम् इष्टादिकारिणा प्राणैः इन्द्रियै मनोहस्तादीन्द्रियज यदानहोमादिभि पूर्वपक्षे चन्द्र आप्यायते सवर्ध्यते । "ओ प्यायी वृद्धौ" इति हि धातु । 'अग्नौ हुतश्च दत्तश्च सर्वे सोमगत भवेत्' इति स्मरणात् । तान् इष्टादिकारिण अपरपक्षेण पञ्चदशभिर्दिनै **प्रजनयति** प्राहयति । स्वावयवभूता कला आशय तीत्यर्थ । कलाभिस्तर्पण करोतीति यावत । 'पुरोवातो गा प्रजनयति' इत्यत्र प्रजनयती त्यस्य गन्ध ग्राहयतीत्यर्थपरत्वदर्शनादिहापि प्रजनय तीत्यस्य ग्राहयतीत्यर्थ उपपद्यते । अपरपक्षेनेति पाठे णत्वाभावश्छन्दस ॥

विषयक , किंतु अन्यादृश सवादपूर्वमतिसर्गसपादकश्चेति । अत्र अर्चिरादिमागण चन्द्र गत्वा सवादो विवक्षित इति श्रीभाष्यतोऽपि ज्ञायते । तथा ह्यासृत्युपक्रमाधिकरणे, 'उपलभ्यते हि देवयानेन पथा गच्छतो विदुष , 'त प्रतिब्रूयात्–' इति चन्द्रमसा सवादवचनेन शरीरसद्भाव " इति । न ह्यत्र गच्छत इत्यस्य गमिष्यत स्थूलदेहात् उत्क्रान्तस्येत्यर्थवर्णन रुचिरम् । अत इह अर्चिरादिक्रमेण चन्द्रम – प्राप्तिवर्णन सुस्थमिति ।

ननु 'वक्ष्यमाण आरुणि वशे इत्युपक्रमबलात् चन्द्रलोकप्राप्त यागफलत्वावसायात् कथमर्चिरादिना तत्प्राप्तिरिति चेत्—उपरि यथाकर्म यथाविद्य तमागतमिति विद्याफलभूतमागमनमिति वर्णनात् तस्य चागमनस्य अर्चिरादिमार्गणैव युक्तत्वात् उपक्रमबलेन चन्द्रलोक लभ्यफलस्य यागसाध्यत्वेऽपि तदर्थमागमन न यष्ट्रन्तराणामिव धूमादिमार्गण, किंतु प्रधानभूतविद्याफलभूतमोक्षार्थोपनतार्चिरादि-

एतद्वै स्वर्गस्य लोकस्य द्वारं यश्चन्द्रमाः ॥ ११ ॥
तं यः प्रत्याह, तमतिसृजते। य एनं न प्रत्याह, तमिह वृष्टिर्भूत्वा

एतद्वै....यश्चन्द्रमाः ।...स्वर्गस्य लोकस्य भगवल्लोकस्य द्वारं दौवारिकप्राय इत्यर्थः ॥ ११ ॥

तं यः प्रत्याह तमतिसृजते । य एनं न...प्रत्याजायते । चन्द्र. स्वप्रश्नस्य यः सदुत्तरं प्रयच्छति, तमतिसृजते भगवल्लोकगमनाय समनुजानाति । यस्तु प्रतिवक्तुमशक्तः, तम् अविद्वांसम्, 'यावत्संपातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुम् । वायुर्भूत्वा धूमो भवति । धूमो भूत्वा अभ्रं भवति । अभ्रं भूत्वा मेघो भवति । मेघो भूत्वा प्रवर्षति । त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते । तद्य इह रमणीयचरणा अभ्याशो ह यत् ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा । य इह कपूयचरणा अभ्याशो ह यत् ते कपूयां

मार्गेणैवेत्यवसीयत इति । अत एवोपक्रमेऽपि अध्वा वा तस्येति प्रकृतस्य विदुषो यष्टुः यष्ट्रन्तरगम्यादध्वनो विलक्षणोऽध्वा चन्द्रलोकफलात् प्रागेवेति ज्ञायत इति सुवचम् । न च आतिवाहिकान्तरैरिव चन्द्रेणापि सोपचारं सगौरवं प्रत्युद्गस्य गृहीतो मुमुक्षुः कथं तेन, 'कोऽसि' इति पृच्छ्यत इति वाच्यम्–अमुमुक्षुवत् अर्वाचीनावान्तरफलानुभवनिमग्नतादशायां कोऽसीति पृच्छ्यमानत्वे बाधकाभावात् । अमुमुक्षुतुल्यदशामुपेक्ष्य मोक्षत्वरासंपादकतयाऽनुकूलत्वाच्च । तमागतं पृच्छतीति । आगत्यानुभूतफलं तं पृच्छतीत्यर्थः । प्रतिब्रूयादित्यत्र य इति शेषः । अस्य प्रतिसंबन्धि तमतिसृजत इति वक्ष्यमाणतत्पदम् ।

चर्षति । स इह कीटो वा पतङ्गो वा शकुनिर्वा शार्दूलो वा सिंहो वा मत्स्यो वा परस्वान् वा पुरुषो वाऽन्यो वैतेषु स्थानेषु प्रत्याजायते॥१२॥

यथाकर्म यथाविद्यं तमागतं पृच्छति, कोऽसीति । तं प्रतिब्रूयात् ॥ १३ ॥

विचक्षणादृतवो रेत आभृतं पञ्चदशात् प्रसूतात् पित्र्यावत-स्तस्मात् ॥ १४ ॥

योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा' इति श्रुत्यर्थोऽत्रानुसन्धेयः । परस्वान् पशुविशेषः । एतेषु स्थानेषु जायते ॥

यथाकर्म... कोऽसीति । इष्टादिकर्मानुसारेण वा ब्रह्मविद्यानुसारेण वा आगतं पुमांसं पृच्छति कोऽसीति । तं प्रतिब्रूयात् । तं वक्ष्यमाणप्रकारेण यः प्रतिब्रूयात्, तमतिसृजत इत्युत्तरेणान्वयः ॥१३॥

प्रतिवचनप्रकारमाह विचक्षणात्....तस्मात् । मासादिकालपरिच्छेदकत्वात् चन्द्रस्य ऋतुशब्देन संबोधनम् । एकस्मिन् औपचारिको बहुवचनप्रयोगः । दिवसपूर्वपक्षोत्तरायणादिलक्षणकालाभिमानिदेवतासाहित्याभिप्रायेण वा ऋतव इति बहुवचनप्रयोगः । हे ऋतवः ! कालप्रवर्तका इत्यर्थः । पित्र्यावतः पितुः कर्म पित्र्यं निषेकादि । तद्वान् । छान्दसो मतौ दीर्घः निषेकादिकर्तुः विचक्षणात् तस्मात् प्रसुतात् । प्रसुतम् उत्पन्नम् । 'सुपां सुलुक्' इत्यादिना आदेशः । पञ्चदशम्=पञ्च दशाः—अवस्थाः यस्य तत् पञ्चदशम् । श्रद्धासोमवृष्ट्यन्नरेतोरूपावस्थापञ्चकयुक्तम् आभृतं शोणितेन संभृतं रेतोऽस्मि । रेतश्शरीरकोऽहमित्यर्थः । अनेन पञ्चाग्निविद्याप्रकारोपन्यासात् स्वस्य प्रकृतिविविक्तात्मस्वरूपमुपन्यस्तं भवति ॥ १४ ॥

पुंसि कर्तरि मेरयध्वम् । पुंसा कर्त्रा मातरि मा निषिक्तम्(क्त?)॥
स जायमुपजायमानो द्वादशत्रयोदशोपमासः ॥ १६ ॥
द्वादशत्रयोदशेन पित्राऽऽसं तद्विदेऽहं प्रति तद्विदेऽहम्॥१७॥

पुंसि...मा निषिक्तम् (क्त ?) । हे ऋतवः ! यूयमितः परं निषेककर्तरि पुंसि रेतोरूपतया अवस्थाना **मेरयध्वम्** मा प्रेषयत । प्रेषणं मा कुरुतेत्यर्थः । उत्तरत्र मा इत्यस्य अत्राप्यनुषङ्गः । पुंसा निषेककर्त्रा मम शरीरपरिग्रहाय मातरि मा निषिक्तम् (क्त ?) निषेकं मा कुरुत । छान्दसः शपो लुक् ॥ १५ ॥

स जायम्....मासः । सोऽहं जायं जनित्वा—आभीक्ष्ण्ये णमुल्—गर्भे गर्भे जनित्वा जनित्वा **उपजायमानः** गर्भात् निर्गच्छन् द्वादश त्रयोदशो वा उपमासः अन्तिममासो यस्य सः **द्वादशत्रयोदशोपमासः** — यद्यपि मनुष्याणां गर्भे दशैव मासाः, अथापि योनिविशेषेषु द्वादशत्रयोदशमासपर्यन्तस्थितिरस्तीति तथोक्तम् द्वादश वा त्रयोदश वा मासान् गर्भे उषित्वेत्यर्थः ॥ १६ ॥

द्वादश....तद्विदेऽहम् । अहं द्वादशेन वा त्रयोदशेन वा मासेन पित्रा आसं प्रादुरासम् । पितृशब्दो मातुरप्युपलक्षकः । **तद्विदे प्रति तद्विदे** । अत्र तच्छब्दः पूर्वोक्तरेतःपरामर्शी । **तद्विदे** रेतसिमचे ।

---

१५. उत्तरत्र मा इत्यस्येति । निषेधार्थकमाशब्दस्येव मामित्यर्थेऽपि शब्दस्यापेक्षितत्वात् उत्तरत्र श्रुतं मेतिपदं मामित्यर्थकमिहानुषञ्जनीयम् । तत्रापि निषेधार्थकमाशब्दोऽयमनुषञ्जनीय इत्यर्थः । पूर्वत्र तस्मादिति पदस्थाने तन्मा इति पाठे तु तत्रत्यो माशब्दो मामित्यर्थक इहान्वेतीति ध्येयम् ।

तन्मा ऋतवो मर्त्यव आभरध्वम् ॥ १८ ॥
तेन सत्येन तपसर्तुरस्म्यार्तवोऽस्मि कोऽस्मि त्वमस्मीति ॥१९॥
तमतिसृजते ॥ २० ॥

तद्विदे तद्विदे प्रति = प्रतिरेतस्सिक्पुरुषमित्यर्थ । चतुर्थी तादर्थ्यार्था । तेषा पितृणा शेषभूत एवासमित्यर्थ ॥ १७ ॥

तन्मा ऋतवो मर्त्यव आभरध्वम् । हे ऋतव इति पूर्ववत् सबोधनम् । **तत्** तस्मात् कारणात् **मर्त्यवे** मृत्यवे जननमरणलक्षणससाराय मा आभरध्वम् – इत पर मा समर्पयत ॥ १८ ॥

तत्र हेतुमाह **तेन सत्येन त्वमस्मीति** । 'तस्मान्न्यासमेषा तपसामतिरिक्तमाहु'रिति श्रुते तच्छरणवरणलक्षणेन तपसा प्रसन्नेन तेन **सत्येन** परमात्मना अनुगृहीतस्सन् **ऋतुरसि** मासर्तुसवत्सरयुगात्मककालरूपोऽहमस्मि । **आर्तवोऽस्मि** तत्तत्कालवर्तिपदार्थरूपोऽप्यहमस्मि । **कोऽस्मि** चतुर्मुखोऽप्यहमस्मि । **त्वमसि** त्वमप्यहमेवास्मि । अत्र अहशब्द , 'अह मनुरभव सूर्यश्च' इति वामदेववाक्यवत् , 'त मा मायुरमृतमित्युपास्स्व' इति इन्द्रवाक्यवच्च स्वात्ममूतपरमात्मपर ॥ साक्षात्कृतसर्वकात्म्योऽहमस्मीत्यर्थ ॥ १९ ॥

तमतिसृजते । एव य प्रतिब्रूयात् , त ब्रह्मवित्त्वेन ब्रह्मलोकगमनार्हता ज्ञात्वा गमनाय अनुजानानीत्यर्थ ॥ २० ॥

एव ब्रह्मविच्चन्द्रमस्सवादप्रकार प्रदर्श्य आदित आरभ्य अर्चि-

ब्रह्मविदा चन्द्रप्राप्ते प्रागेव देवयानगताग्निलोकादे प्राप्तत्वात् प्रश्नप्रतिवचनानन्तर देवयानोपक्रमायोगात् अग्निलोकादिकीर्तनम्या न्यमादाय दर्शयति आदित आरभ्यार्चिरादीति । अत्र, 'मुमुक्षुरप

स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं

रादिगतिक्रममुपदिशति स एतं.... आगच्छति । सः ब्रह्मवित् देह वियोगकाल एव सुकृतदुष्कृते विधूय देवयानमार्गमापद्य अवलम्ब्य अग्निलोकमागच्छति । 'तेऽर्चिषमभिसंभवन्ति' इति अर्चिश्शब्दितस्याग्नेः देवयानमार्गप्रथमपर्वत्वश्रवणात् प्रथमत. अग्निलोकप्राप्तिरुपपन्ना । स वायुलोकम् । यद्यप्यत्राग्निलोकानन्तरं वायुलोकः श्रूयते. तथापि श्रुत्यन्तरे, 'अर्चिषोऽहरह्न आपूर्यमाणपक्षमा पूर्यमाणपक्षात् यान् षण्मा-

चन्द्रलोकफलानन्तरमेव देवयानं प्रति आयाति । पूर्वं तु मार्गान्तरेण चन्द्रं प्राप्तः । अतो देवयाने यावत् उपरिततनलोकस्थितेन गन्तव्यम्, तावतो वर्त्मन एव तं प्रति अध्वता' इति न मन्तव्यम् । अग्निलो-कादिक्रमध्यनेन प्रागातमेवेति ज्ञापयितुमेवं वाक्यमिति भावः । तथाच आगच्छतीति वर्तमानकालो न विवक्षित इति । अत्र एतमिति देवयान-विशेषणात्, 'अग्निलोकमागच्छति स वायुलोकं-स ब्रह्मलोकमिति श्रुतिप्रसिद्धमेतं देवयानं पन्थानं स आपद्य' इत्यन्वयोऽपि स्यात् । तदा एतदुपरि, 'वर्तेन' इति शेषो वा, वाक्यस्यास्य तमित्यंवित् आगच्छतीति वक्ष्यमाणेनैकवाक्यता वा भवितुमर्हति । अत्रोपनिषदि यथायथमन्वयवत्त्वं "छन्दत उभयाविरोधात्" इति सूत्रेण दर्शित-मेव । अर्चिरादिमार्गे कतिपयमात्रनिर्देशोऽयमन्योपलक्षकः । तथाच अग्निलोकानन्तरं वायुलोकात् प्राक् दिवसज्योत्स्नापक्षोत्तरायण-वत्सराणां ग्रहणम् । वायोरनन्तरं वरुणात् प्राक् आदित्यचन्द्रवैद्युतानां ग्रहणम् । एवञ्च वरुणलोकानन्तरमादित्यलोकपाठोऽत्र कृतो नैव क्रमसाधकः । स पूर्वमाक्रष्टव्यः, प्रमाणान्तरानुसारात् । अत्रैव्म, स आदित्यलोकमिति पाठः किं सर्वकोशेषु, उतान्यथाऽपि पाठ इति विचारो वर्तितो भावप्रकाशिकायाम् । वरुणाधिकरणे तु श्रीभाष्ये अत्र श्रुतानां निवेशक्रमयाथात्म्यं यथापाठं प्रकृतवाक्यग्रहणेनेत्थं

स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम् ॥ २१ ॥

सानुदङ् आदित्य एति मासेभ्यो देवलोकम्' इति देवलोक [शब्द ?] निर्दिष्टस्य वायुलोकस्य उदगयनादूर्ध्वं श्रवणात् उदगयनादूर्ध्वमेव वायुलोको निवेश्य। तत्राप्युदगयनादूर्ध्वं छान्दोग्ये, 'मासेभ्य संवत्सरम्' इति श्रवणात्, अधिककालाना न्यूनकालादूर्ध्वं निवेशस्य, 'अह आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति' इत्यत्र दृष्टत्वात् उदगयनापेक्षया अधिककालस्य संवत्सरस्य तदूर्ध्वनिवेश सिद्धः।

स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकमितीदं वाक्यं अर्चिरादिपादे चिन्तितम्। 'संवत्सरात् आदित्यमादित्याचन्द्रमसम्' इति छान्दोग्ये, 'यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुलोकमागच्छति। स तत्र विजिहीते, यथा रथचक्रस्य खम्। तेन स ऊर्ध्वमाक्रमते। स आदित्यमागच्छति। तस्मै स तत्र विजिहीते यथा डम्बरस्य खम्। तेन स ऊर्ध्वमाक्रमते। स चन्द्रमस

बोधितमस्ति, "अत्राग्निलोकशब्दस्यार्चिःपर्यायत्वेन प्राथम्यमविगीतम्। वायोश्च संवत्सरादूर्ध्वं निवेश उक्तः। आदित्यस्याप्यत्र प्राप्तपाठक्रमबाधेन, 'देवलोकादादित्यम्' इति वाजसनेयकगतश्रुतिक्रमात् देवलोकशब्दाभिहितात् वायोरुपरि निवेशः सिद्धः। इदानीं वरुणेन्द्रप्रजापतिषु चिन्ता" इति।

तत् सिद्धम्—उपासकस्य चन्द्रलोकात् प्रागेव देवयानमार्गप्रविष्टतया नेदं चन्द्रवृत्तान्तिरपर्गानन्तरं देवयानप्रथमप्रवेशबोधकमिति, नापि यथावस्थितातिवाहिकक्रममनुरुध्य प्रवृत्तमिति च।

मागच्छति' इति बृहदारण्यके च श्रुतत्वात् संवत्सरादूर्ध्वं चन्द्रमसः प्रा आदित्यस्य निवेशः सिद्धः। तत्र च वरुणेन्द्रप्रजाप तीनामपि पठितानां पाठार्थवत्त्वाय क्वचिन्निवेशे कर्तव्ये, वायुलोकं वरुणलोकमिति पाठक्रमानुसारेण वायोरूर्ध्वं वरुणो निवेशयितव्यः। इन्द्रप्रजापती अपि तदनन्तरं निवेशयितव्यौ। न च, आदित्यलोकम्, इन्द्रलोकं प्रजापतिलोकमिति पाठक्रमादादित्यादूर्ध्वं चन्द्रात् प्रागेव निवेशोऽस्त्विति वाच्यम्—आदित्याच्चन्द्रमसम्' इति आदित्यादूर्ध्वं चन्द्रस्य श्रवणेन तत्क्रमबाधप्रसङ्गात्। न च चन्द्रादूर्ध्वं तयोर्निवेशोऽस्त्विति वाच्यम्—'चन्द्रमसो विद्युतम्' इति श्रुतिक्रमबाधप्रसङ्गात्। ननु 'देवलोकादादित्यम्' इति देवलोकशब्दितवायोरादित्यस्य च क्रमस्य श्रुतत्वात् तत्रेन्द्रप्रजापत्योर्निवेशे तत्क्रमभङ्गः स्यादिति चेन्न—वाय्वादित्ययोरन्तराले वरुणस्य निवेशनीयतया तेनैव वाय्वादित्ययोरानन्तर्यस्य तत्रैवेन्द्रप्रजापत्योरपि निवेश.। अतश्च वरुणेन्द्रप्रजापतीनां त्रयाणामपि वाय्वादित्ययोरन्तराल एव निवेशोऽस्त्विति प्राप्ते—

उच्यते—"तटितोऽधि वरुणः संबन्धात्।" तटित ऊर्ध्वं वरुणस्य निवेशः। कुतः? संबन्धात्। विद्युद्वरुणयोः द्वयोरपि मेघोदरवर्तित्वरूपसंबन्धसत्त्वात् विद्युत ऊर्ध्वं वरुणस्य निवेशः। ततः परस्तात् इन्द्रप्रजापत्योर्निवेश.। तथा हि सति, 'देवलोकादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतम्'इति निबद्धोऽपि क्रमो न बाधितो भवति। न चैवं विद्युत ऊर्ध्वं वरुणेन्द्रप्रजापतीनां निवेशे तेषामेव ब्रह्मगमयितृत्वेन, 'तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयात'इति वैद्युतपुरुषस्य गमयितृत्वं

तस्य ह वा एतस्य ब्रह्मलोकस्यारो ह्रदः । मुहूर्ता यष्टिहाः ॥ २२ ॥ विरजा (जरा) नदी ॥ २३ ॥ तिल्यो वृक्षः ॥ २४ ॥ सालज्यं संस्थानं ॥ २५ ॥ अपराजितमायतनम् ॥ २६ ॥

श्रुतं विरुद्धचेतेति वाच्यम्—वरुणेन्द्रप्रजापतीनाम [त्र^] गमयितृत्वेऽपि वैद्युतपुरुषस्याप्यनुग्राहकतया गमयितृत्वसंभवादिति स्थितम् । प्रकृतमनुसरामः ॥ २१ ॥

तस्यारो ह्रदो मुहूर्ता यष्टिहाः । तस्य ब्रह्मलोकस्य समीपे अरसंज्ञको ह्रदः । छान्दोग्ये, 'अरश्च ण्यश्चार्णवौ ब्रह्मलोके ऐरम्मदीयं सरः' इति सरस्त्वयमुक्तम् । ततः परस्तादविदूरे मुहूर्तसंज्ञकाः यष्टिहाः । यष्टिभिः अब्रह्मविदो गन्तॄन् घ्नन्तीति **यष्टिहाः** ॥ २२ ॥

[1]**विजरा नदी** । विजरेति संज्ञावती नदी । विरजा नदीत्यपि पाठोऽस्ति । जरारजोविरोधित्वात् विजरा विरजेत्यु(ति चो^)च्यते ॥२३

तिल्यो वृक्षः । ततोऽविदूरे तिल्यसंज्ञिको वृक्षः । छान्दोग्ये, 'तदश्वत्थः सोमसवन ' इति सोमसवनसंज्ञकोऽश्वत्थो वृक्ष उक्तः ॥ २४ ॥

सालज्यं संस्थानम् । सालज्यनामकं संस्थानं=स्थानीयम् । 'स्थानीयं निगमोऽन्यत्तु यन्मूलनगराद्बहिः.' इत्यमर । सालेषु प्राकारेषु ज्या युद्धसाधनं यस्य तत् सालज्यम् ॥ २५ ॥ **अपराजितमायतनम्** । 'अपराजिता पूः ब्रह्मण' इति श्रवणात् अपराजितसंज्ञकमायतनं पुरमित्यर्थः । अब्रह्मविद्भिर्न जीयत इत्यपराजितम् ॥ २६ ॥

उपासकस्योपासनफलं ब्रह्मलोकप्राप्तिपर्यन्तमेतावतोक्तम्, अथ ब्रह्मपर्यङ्कारोहणान्तं तद् वक्ष्यते; यदनन्तरमेवास्य परिपूर्णब्रह्मानुभवः। तदर्थमत्र स्थितान् विशेषान् निर्दिशति तस्येत्यादिना ।

इन्द्रप्रजापती द्वारगोपौ ॥ २७ ॥ विभुप्रमितम् ॥ २८ ॥
विचक्षणा आसन्दी ॥ २९ ॥ अमितौजाः पर्यङ्कः ॥ ३० ॥
प्रिया च मानसी प्रतिरूपा च चाक्षुषी पुष्पाण्यपचयतः(?) ॥ ३१ ॥
यतो वै च जगत्यम्बाश्चाम्बायवा(सा)श्चाप्सरसोऽम्बया नद्यः।
तमित्थंविदागच्छति ॥ ३२ ॥
तं ब्रह्माह—अभिधावत मम यशसा विरजां (विजरां) वाऽयं नदीं

इन्द्रप्रजापती द्वारगोपौ। इन्द्रप्रजापतिसंज्ञकौ पट्टणद्वारपालकौ॥

विभुप्रमितम्। अत्र मण्टपमिति शेषः। विभुत्वेन अतिविस्तृतत्वेन प्रमितं हिरण्मयमण्टपमित्यर्थः। 'प्रभुविमितं हिरण्मयम्' इति छान्दोग्योक्तेः ॥ २८ ॥ **विचक्षणा आसन्दी।** विचक्षणसंज्ञिका आसन्दी धर्मादिपीठमित्यर्थः ॥ २९ ॥ **अमितौजाः पर्यङ्कः।** अमितौजा नाम योगपर्यङ्कः ॥ ३० ॥ **प्रिया च...अपचयतः?।** मनोधिष्ठात्री नाम्ना प्रिया च, चक्षुरधिष्ठात्री नाम्ना प्रतिरूपा च पुष्पाणि अपचयतः (?) कुसुमानि देव्यौ ॥ ३१ ॥

तमित्थंविदागच्छति। तादृशब्रह्मलोकमेतादृशस्वरूपविदागच्छति॥

तं ब्रह्माह...जिगीष्य(?)तीति। यूयं तं ब्रह्मविदमागच्छन्त**मभिधावत** अभिगच्छत = प्रत्युत्थानं कुरुत। मम यशसा ममानुग्रहेणायं ब्रह्मवित् **विरजां नदीं** विरजानदीसमीपं प्राप्तवान्। विर-

---

अपचयत इति : चिञ चयने। चुरादिः। ञित्करणसामर्थ्यात् णिज्विकल्पः। यतो वै इत्यादिभागस्य भाष्यं न दृश्यते। तदर्थश्च प्रियादिवत् यत्र सर्वजगदम्बाभूता अन्याश्च स्त्रियः सन्ति, तथा तदंशभूताः अम्बया मुख्यभूतया नद्यः प्रमोदकोलाहलं कुर्वत्यः अप्सरसश्च सन्तीति। तमित्यादि। तमित्यस्य तं प्रति-तद्विषये इत्यर्थ उचितः। अन्यथा अभि-

प्रापत्। न वाऽयं जिगीष्यतीति (जरयिष्यतीति) ॥ ३३ ॥

तं पञ्च शतान्यप्सरसां प्रतिधावन्ति, शतं मालाहस्ताः, शतम(मा)ञ्जनहस्ताः, शतं चूर्णहस्ताः, शतं वासोहस्ताः, शतं फणहस्ताः, तं ब्रह्मालङ्कारेणालंकुर्वन्ति। स ब्रह्मालङ्कारेणालंकृतो ब्रह्म विद्वान् ब्रह्मैवाभिप्रैति ॥ ३४ ॥

जानदी [समीपदेश ?] संबन्धात् इत परं विरजामेष्यतीति परमात्मा अप्सरसः प्रतिवदतीत्यर्थः ॥ ३३ ॥

धावतेममिति स्यात्। अत्र नदीं प्रापदिति प्रयोगात् मुक्तस्य विरजानदीप्राप्त्यनन्तरमेव ब्रह्मणा अप्सरसां प्रेरणमिति ज्ञायते। अप्सरोभिः क्रियमाणोऽलङ्कारश्च मुक्तस्याप्राकृतविग्रहे, न तु प्राकृतभूतसूक्ष्मे। एवं ब्रह्मालङ्कारेणालङ्कृतो ब्रह्मैवाभिप्रैतीत्युक्तम्; न तु, अलंकृत आगच्छत्यरं ह्रदमिति। अतः तं ब्रह्माहेत्यतः प्रागेव स आगच्छत्यरं ह्रदमित्यादिः तां मनसैवात्येति इत्यन्तो भागो योज्यः, अर्थक्रमानुसारात्। यस्तु तदुपरि तत् सुकृतदुष्कृते धूनुते इत्यादिः, विदुष्कृतो ब्रह्म विद्वान् ब्रह्मैवाभिप्रैतीति भागः, स स्वस्थानेऽनन्वितः; सुकृतदुष्कृतधूननादेः विरजानद्यतिक्रमणपश्चाद्भावित्वाभावात्; स्थूलदेहवियोगकालिकत्वात्, स एतं देवयानं पन्थानमापद्यत इति प्रथमश्रुतवाक्यात् प्राक् स घटनीय इति साम्परायाधिकरणे, "छन्दत उभयाविरोधात्" इति सूत्र एव स्थितम्। स आगच्छति तिल्यं वृक्षमिति तदनन्तरश्रुतवाक्यार्थस्तावत् ब्रह्मालङ्कारेणालङ्करणानन्तरमेव भवतु। अस्तु वा तिल्यवृक्षप्राप्त्यनन्तरमेव अप्सरसां प्रत्युद्गताना प्राप्तिः। अत्र छान्दोग्योक्तयोरैरंमदीयसरस्सोमसवनाख्याश्वत्थयोरपि यथायथं घटनं युक्तम्। सोऽश्वत्थ एवायं तिल्य इत्यपि विमृश्यम्। सर्वमिदं सूक्ष्मं विभाव्यैव श्रीमति रहस्यत्रयसारे, गतिविशेषाधिकारे, 'विरजापारं प्रापय्य अप्राकृतशरीरं प्रदाय ऐरम्मदीयं सरः संगमय्य

स आगच्छत्यरं ह्रदम् । तन्मनसाऽत्येति । तमृत्वा संप्रतिविदो मज्जन्ति ॥ ३५ ॥

तं पञ्च शतानि....अभिप्रैति । फणः भूषणम् । ब्रह्मैवाभिप्रैति । ब्रह्मदर्शनोत्सुक एव भवति ; नाप्सरस्संभाषणवासोभूषणादिषु सादर इत्यर्थः । शिष्टं स्पष्टम् ॥ ३४ ॥

स आगच्छति....मज्जन्ति । तमृत्वा तं ह्रदं प्राप्य संप्रति इदानीमपि विदः ज्ञानिनः मज्जन्ति स्नान्तीत्यर्थः ॥ ३५ ॥

सोमसवनाख्यमश्वत्थमुपगमय्य मालाञ्जनादिहस्ता अप्सरसः प्रत्युद्गमय्य ब्रह्मालङ्कारेणालङ्कार्य ब्रह्मगन्धरसतेजांसि प्रवेश्य' इति क्रमः श्रीदेशिकचरणैर्दर्शित इति तदवधानेनेहार्थक्रमविन्यासो भाव्यः । विरजां नदीं प्रापदित्यस्य प्रकृतभाष्योक्तरीत्या विरजानदीसमीपं प्राप्तवानिति समीपदेशप्राप्तिरूपार्थविवक्षया स आगच्छति विरजां नदीमित्यादिवक्ष्यमाणवाक्यसामञ्जस्यसंपादनेऽपि अत्राप्सरःक्रियमाणालङ्कारादिवर्णनं हि न प्राकृतशरीरे घटते इति ध्येयम् ।

संप्रतिविदो मज्जन्तीति । सम्प्रतिशब्दस्य सम्यगित्यर्थः श्रुतिप्रसिद्धः, छान्दोग्ये वैश्वानरादिविद्यासु दृष्टश्च । अतो यथावस्थितपरावरतत्त्ववेदिन इति संप्रतिविद इत्यस्यार्थः स्यात् । अस्तु तावत् कोऽप्यर्थः । के ते मज्जनकर्तारः । न हि नित्यमुक्तानां मज्जनं पावनमपेक्षितम् ; न च विरजादि नेदिष्ठं विहायात्र मज्जने विशेषगमकं किञ्चिदिति चेत्–सन्त्वेते संप्रतिविदः सनकसनन्दनादिसमाः माहात्म्यबलात् केनापि मार्गेण प्रकृतिमण्डलमतिक्रम्य तत्संनिहितेऽम्बरे शुद्ध्यर्थं तदा तदा समागत्य मज्जनकर्तारः । ततः परं तु परमपदे न ते गन्तुं प्रभवन्ति, यत्र मुहूर्ताः यष्टिहा अमानवानानीतप्रतिषेद्धारो जाग्रति । पञ्चाग्निविद्यानिष्ठा या ब्रह्मप्राप्तेः प्राक् कञ्चित् कालं कैवल्यभुजस्तत्र गन्तुं शक्ताः ।

स आगच्छति मुहूर्तान् यष्टिहान्। तेऽस्मादपद्रवन्ति ॥ ३६ ॥
स आगच्छति विरजां नदीम्। तां मनसैवात्येति। तत् सुकृतदुष्कृते

स आगच्छति मुहूर्तान् अपद्रवन्ति। तमनिरुन्धाना दूरतो गच्छन्तीत्यर्थः ॥ ३६ ॥

तत् सुकृतदुष्कृते धूनुते। तत् तदैवेत्यर्थः। अयञ्च तच्छब्दः नान्यवहितविरजानद्यतिक्रमणकालवाची। अपि तु, 'ये वै के चास्माल्लोकात् प्रयन्ति' इति वाक्यनिर्दिष्टप्रयाणकालवाची।

इदञ्च वाक्यं गुणोपसंहारपादे चिन्तितम्—

कौषीतकिनामुपनिषदि, 'विरजां नदीं मनसा अत्येति तत् सुकृतदुष्कृते धूनुते' इति विरजानद्यतिक्रमणहेतुतया तदनन्तरभावि सुकृतदुष्कृतधूननश्रवणात्, 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवानि' इति, 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' इति च श्रुत्या देहवियोगसमकालतया सुकृतदुष्कृतहानसंक्रमणयोः श्रवणात् कर्मैकदेशस्य देहवियोगकाले नाशः, शेषस्य विरजानद्यतिक्रमणानन्तरं नाश इति प्राप्ते उच्यते—"साम्पराये तर्तव्याभावात् तथा ह्यन्ये"। साम्पराये—देहापक्रमणकाल एव सुकृतदुष्कृतविनाशः। ततः ऊर्ध्वं तत्साध्यस्य तर्तव्यस्य—प्राप्तव्यस्य सुखदुःखानुभवरूप

तत् सुकृतदुष्कृते धूनुत इत्यादिकं, स एतं देवयानमिति वाक्यात् प्राक् योजनीयमिति प्रागेवोक्तम्। अस्यात्र पाठस्तु, विरजातिक्रमणानन्तरभावि ब्रह्मालङ्कारार्हमस्य शरीरं न कर्माधीनम्, किन्तु अप्राकृतमिति ज्ञापनार्थः।

फलस्याभावात् । तथा ह्यन्ये शाखिनः ब्रह्मविदः शरीरपरित्यागानन्तरं ब्रह्मप्राप्तिव्यतिरेकेण कर्मफलानुभवाभावमधीयते, 'तस्य तावदेव चिरम्, यावन्न विमोक्ष्येऽथ संपत्स्ये' इति । "छन्दत उभयाविरोधात्" । अर्थस्वाभाव्यात् देहवियोगकाल एव कर्मनाश इति निश्चिते तयोरविरोधाय, 'विरजां नदीं मनसा अत्येति तत् सुकृतदुष्कृते धूनुते' इत्यस्य वाक्यस्य तच्छब्दस्य छन्दतः यथेष्टमन्वयोऽङ्गीकर्तव्य ।[शंकते?]"गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः" । सुकृतदुष्कृतैकदेशस्य देहवियोगकाले हानिः, शेषस्याध्वनि हानिरित्यभ्युपगम एव देवयानगतिश्रुतेरर्थवत्त्वम् । इतरथा हि देहवियोगकाल एव सर्वकर्मक्षये सूक्ष्मशरीरस्यापि नाशेन केवलस्याऽऽत्मनो देवयानासम्भवेन देवयानश्रुतेरर्थशून्यत्वमेव स्यादित्यर्थः। [अत्र?] उत्तरमाह—"उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्" । देहोत्क्रान्तिकाल एव सर्वकर्मक्षय उपपन्नः । क्षीणकर्मणोऽपि विदुषो विद्यामाहात्म्यात् सूक्ष्मदेहानुवृत्तिसंभवेन देवयानगमनसंभवात् । यथा लोके सस्यादि-समृद्ध्यर्थमारब्धेऽपि तटाकादिके, सस्यादिसमृद्धीच्छायां तटाकादि-निर्माणहेतुभूतायां नष्टायामपि, पानीयपानाद्यर्थतया तटाकादिः स्थाप्यते, एवं कर्महेतुकसूक्ष्मदेहो नष्टेऽपि कर्मणि विद्याफलाय स्थाप्यत इत्यर्थः । ननु देहवियोगकाल एव कर्मनाशे ब्रह्मविदां वसिष्ठावान्तरतप प्रभृतीनां पुत्रजन्मादिनिमित्तसुखदुःखानुभवो न स्यादित्यत्राह—"यावदधिकार-

---

सूक्ष्मदेहानुवृत्तीति। ननु सस्याद्यर्थतया समारब्धस्य तटाकस्य पानीयाद्यर्थतया पश्चात् स्थापनवत् किमर्थमारब्धः सूक्ष्मदेहो विद्यामाहात्म्यात् स्थाप्यते? न च वेदान्तिमते सांख्यमत इव सकल-

धूनुते । तस्य प्रिया ज्ञातय सुकृतमुपयन्ति , अप्रिया दुष्कृतम् ॥३७॥

मवस्थितिराधिकारिकाणाम्' । आधिकारिकाणा वसिष्ठादीना यावद धिकार कर्मावतिष्ठते , प्रारब्धस्य भोगैकनाश्यत्वादिति स्थिति (तम्²) । प्रकृतमनुसराम । तस्य दुष्कृतम् । ब्रह्मविद इष्टानिष्टफलदित्सालक्षण-परमात्मप्रीत्यप्रीतिरूपसुकृतदुष्कृतयोश्चतस्रोऽवस्था श्रुता —विनाश· अश्लेष धूननम् उपायनञ्चेति। विनाश पूर्वाघविषय । कर्मफलदित्साप्रति-बन्धलक्षणोऽश्लेष उत्तराघविषय । तौ च—यद्ययमुपासक प्रक्रान्त-मुपासन समापयेत् , पूर्वोत्तरयो कर्मणो फल न दास्यामीत्येव भगव त्सकल्परूपौ । उत्तरपूर्वाघाश्लेषविनाशौ दर्शनसमानाकारज्ञानारम्भ एव "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ "इति सूत्रोक्तन्यायेन भवत । अन्तिमप्रत्ययपर्यन्तोपासननिवृत्त्यनन्तरम् , विनष्टाश्लिष्टयोरेव कर्मणो ,

स्थूलिकालिकशरीरानुवृत्त सूक्ष्मशरीर किञ्चिदस्ति, तदभावस्याधि-करणसारावली स्पष्टमुक्ते । यथा,

कल्पादौ भूतसूक्ष्मप्रभृतिभिरुदित वर्ष्म कल्पान्तनाश्य
प्रत्येक प्राणिभेदे नियतमनियतस्थूलदेहानुयायि ।
लिङ्गाख्य भक्तिकान्त पदचक्रपदस्थायि सारथ्यै प्रगीतम्
सूक्ष्माश पूर्वभूतरुपरितनतनोर्वीजमन्वेष्यते तत् ॥(४८६) इति ,

इति चेत्—उच्यत । कर्मफलानुभवार्थं कल्पित यत् चरम स्थूलशरीर मुमुक्षो प्रस्थानात् पश्चाद् भस्मादिभावमापत्स्यमानम् , तस्य कश्चिदश पूर्वं स्थूलशरीरे फलानुभवायतनतयोपयुक्त सप्रति गत्यार्थौपयिकतया विद्यया स्थाप्यते स्थूलदेहेन सह भस्मताद्यनापाद-नेन । अयश्च चरमशरीराश न कस्यचिद्देहस्य वीजभूत , उपरि प्राकृत-देहप्रसक्त्यभावात्। अतोऽय सूक्ष्माशो न भाविफलानुभवोपयोगीति।

[तत्] यथा रथेन धावन् रथचक्रे पर्यवेक्षते, एवमहोरात्रे पर्यवेक्षते। एवं सुकृतदुष्कृते, सर्वाणि च द्वंद्वानि ॥ ३८ ॥

स एष विसुकृतो विदुष्कृतो ब्रह्म विद्वान् ब्रह्मैवाभिप्रैति ॥३९॥

स आगच्छति तिल्यं वृक्षम्; तं ब्रह्मगन्धः प्रविशति। स आगच्छति सालज्यं संस्थानम्; तं ब्रह्मरसः प्रविशति। स आगच्छति अपराजितमायतनम्; तं ब्रह्मतेजः प्रविशति। स आगच्छतीन्द्रप्रजापती द्वारगोपौ; तावस्मादपद्रवतः। स आगच्छति विभुप्रमितम्; तं ब्रह्मयशः प्रविशति ॥ ४० ॥

फलं नैव दास्यामीति संकल्परूपं विधूननं देहवियोगकाले भवति; तस्मिन्नेव समये एतदीयप्रियाप्रियजनेषु एतदीयसुकृतदुष्कृतानुरूपेष्टानिष्टफलदित्सालक्षणमुपायनञ्च भवति ॥ ३७ ॥

यथा....द्वन्द्वानि। यथा रथेन धावन् पुरुषः स्वयं निर्व्यापार एव सन् व्याप्रियमाणरथचक्रादिकं साक्षितया पश्यन् गमनक्रियाजनितशरीरायासादिशून्यस्सन् हृष्टो भवति। एवं प्रवर्तमानकालचक्रं सुकृतदुष्कृततत्साध्यद्वन्द्वपरम्परां स्वानन्वितामेव पश्यन् निर्दुःखसुखमास्ते ॥३८

स एषः....अभिप्रैति। स्पष्टोऽर्थः ॥ ३९ ॥

स आगच्छति....। यथा प्रभाते अनुकूलं आदित्यादिसामीप्यातिशयकृतं प्रकाशाधिक्यम्, एवं देशविशेषविशिष्टब्रह्मसान्निध्यातिशयानुकूलसमेधमानविकासावस्थाविशेषाः ब्रह्मगन्धब्रह्मरसादिशब्दैरभिलप्यन्ते। ब्रह्मणः सर्वगन्धत्वादेः, 'सर्वगन्धस्सर्वरस.' इति प्रतिपन्नत्वात् यथाश्रुतार्थग्रहणेऽपि न दोषः। अपद्रवतः तस्मै मार्गं प्रयच्छत इत्यर्थः॥

एवमहोरात्रे इति। रथेन गच्छतः रथचक्राधीनभ्रमणानाश्रयत्ववत् अहोरात्रादिद्वन्द्वव्यापारानालीढत्वमस्येति भावः।

स आगच्छति विचक्षणामासन्दीम्, बृहद्रथन्तरे सामनी पूर्वौ पादौ । श्यैतनौधसे चापरौ पादौ । वैरूपवैराजे शाक्करैवते तिरश्ची । सा प्रज्ञा । प्रज्ञया हि विपश्यति ॥ ४१ ॥
स आगच्छत्यमितौजसं पर्यङ्कम्, स प्राण ॥ ४२ ॥
तस्य भूतं च भविष्यच्च पूर्वौ पादौ । श्रीश्च इरा चापरौ ॥ ४३ ॥
बृहद्रथन्तरे अनूच्ये ॥ ४४ ॥ भद्रयज्ञायज्ञीये शीर्षण्ये ॥ ४५ ॥
ऋचश्च सामानि च प्राचीनाततम् ॥ ४६ ॥
यजूंषि तिरश्चीनानि ॥ ४७ ॥ सोमांशव उपस्तरणम् ॥ ४८ ॥
उद्गीथ उपश्रीः ॥ ४९ ॥ श्रीरुपबर्हणम् ॥ ५० ॥

तस्मिन् ब्रह्मास्ते । तमित्थंवित् पादेनैवाग्र आरोहति । तं ब्रह्माह, कोऽसीति । तं प्रतिब्रूयात् ॥ ५१ ॥

सा प्रज्ञा प्रज्ञाधिष्ठात्री देवता । तत्सम्बन्धादयं सर्वं पश्यतीत्यर्थः ॥

प्राणः प्राणाभिमानीत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ४२ ॥

तस्य पर्यङ्कस्य चतुरोऽपि पादानाह **तस्य...अपरौ ।**

भूतभविष्यत्कालैश्वर्यान्नाभिमानिदेवताश्चत्वारः पादाः ॥ ४३ ॥

बृहद्रथन्तरे अनूच्ये । बृहद्रथन्तराख्ये सामनी अनूचीनदारुणी इत्यर्थः ॥ ४४ ॥ **भद्र शीर्षण्ये ।** भद्रयज्ञायज्ञीयाख्ये सामनी तिरश्चीनदारुणी ॥ ४५ ॥ **प्राचीनाततं** पर्यङ्कायता दीर्घा तान्तवरज्जुविशेषाः ॥ ४६ **तिरश्चीनानि** तिर्यक्तरज्जुविशेषाः ॥ ४७ ॥ **सोमांशव उपस्तरणम् ।** चन्द्रकिरणा एवाऽऽस्तरणम् ॥ ४८ ॥ **उद्गीथ उपश्रीः** श्रीसमीपे वर्तमानमास्तरणमुद्गीथः ॥ ४९ ॥ **उपबर्हणं** पादोपधानम् ॥ ५० ॥

तस्मिन् प्रतिब्रूयात् । स्पष्टोऽर्थः ॥ ५१ ॥

तं प्रतिब्रूयादिति । पद प्रतिब्रवत —

ऋतुरस्म्यार्तवोऽस्मि ॥ ५२ ॥ आकाशाद्योनेः संभूतो भयायैतत् (भार्यायै रेतः) संवत्सरस्य तेजोभूतस्य भूतस्य भूतस्यात्मा (भूतस्यात्मभूतस्य) त्वमात्माऽसि । यस्त्वमसि सोऽहमस्मीति ॥ ५३ ॥ [आत्मासीति ।] ॥ ५४ ॥ तमाह कोऽहमस्मीति ॥ ५५ ॥

ऋतुः... असि । अयञ्च मन्त्रखण्डः प्राग्व्याकृतः ॥ ५२ ॥

आकाशात् योनेः....अस्मीति। 'अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशम् आकाशाद्वायुम्। वायुर्भूत्वा धूमो भवति' इति श्रुत्युक्तरीत्या आकाशवाय्वादिक्रमेणावरुह्य, "योनेश्शरीरम्" इति सूत्रोक्तरीत्या योनेस्सम्भूतोऽस्मि । **भयायैतत्** एतत् भवनमयं (भवनं ?) भयहेतुः । **संवत्सरस्य**-संवत्सरे, **तेजोभूतस्य** रेतोभूतस्य **भूतस्य भूतस्य** सर्वभूतस्य **त्वमात्मा** पौनःपुन्येन श्रद्धासोमवृष्ट्यन्नरेतोरूपशरीरयुक्तस्य सर्वस्यापि जीवजातस्य त्वमात्मा । [अनश्च प्रकृतिवियुक्तत्वं ब्रह्मात्मकत्वञ्च स्वस्योपन्यस्तं भवति।] त्वदात्मकोऽहमियन्तं कालम्, 'अनेकजन्मसाहस्रीं संसारपदवीं व्रजन् । मोहश्रमं प्रयातोऽसौ वासनारेणुकुण्ठितः' इति न्यायेन संसारे पतितोऽस्मीत्यर्थः ॥ ५३ ॥ मम कथमात्मत्वमित्यत्राह— **आत्मासि** व्यापकोऽसीत्यर्थः । व्यापकत्वादात्मत्वमुपपद्यत इति भावः ॥ ५४ ॥ **तमाह**— । यस्त्वमसि सोऽहमस्मीत्युक्तम् । अहं त्वा

"अनयाऽहं वशीभूतः कालमेतं न बुद्धवान् । उच्चमध्यमनीचान्तां तामहं कथमावसे ॥ [अपेत्याहमिमां हित्वा संश्रयिष्ये निरामयम् । अनेन साम्यं यास्यामि नानयाऽहमचेतसा ॥ क्षमं मम सहानेन ह्येकत्वं नानया सह ।" इति श्रीमद्रहस्यत्रयसारोद्धृतवचनार्थो मनसि विपरिवर्तत इति मन्तव्यम् ।

सत्यमिति ब्रूयात् ॥ ५६ ॥ कि तत्, यत् सत्यमिति ॥ ५७ ॥

यदन्यत् देवेभ्यश्च प्राणेभ्यश्च, तत् सत्। अथ यत् देवाश्च प्राणाश्च, तत् त्यम् (यम्)। तदेतया वाचाऽभिव्याह्रियते सत्यमिति। एतावदिदम्। सर्वमिदम्। सर्वमस्मीत्येवैनं तदाह ॥ ५८ ॥

तदेतत् श्लोकेनाप्युक्तम्—

यजूदरः सामशिरा असावृङ्मूर्तिरव्ययः।

स ब्रह्मेति हि विज्ञेयः ऋषिर्ब्रह्ममयो महान् ॥ इति।

तमाह–केन [मे] पौंस्नानि नामान्याप्नोषीति। प्राणेनेति ब्रूयात्। केन स्त्रीनामानीति। वाचेति। केन नपुंसकनामानीति। मनसेति ॥५९

क इति पृच्छतीत्यर्थ ॥ ५५ ॥ उत्तरमाह—सत्यमिति ॥ ५६ ॥ पुन पृच्छति किं तत् यत् सत्यमिति ॥ ५७ ॥

यदन्यत्...तदाह। सदित्यनेन देवप्राणव्यतिरिक्तमुच्यते। त्यमित्यनेन देवप्राणा। अत सत्यमित्युक्त्या सर्वं संगृहीतं भवति। ततश्च सत्यमस्मीत्युक्ते सर्वमस्मीत्युक्तं स्यादित्यर्थ। ततश्च सर्वेषामात्मैव मदात्मेत्यर्थ ॥ ५८ ॥

देहेन्द्रियमन प्राणज्ञानव्यतिरेक प्रश्नोत्तरव्याजेन स्पष्टयति **तमाह केन मे...**। नपुंसकत्वादीनि गुणत्रयोन्मेषविशेषरूपाणि, न तु आत्मस्वरूपगतानि। ततश्च तादृशधर्मयुक्तमनोवाक्प्राणनिष्ठान्येव नपुंसकत्व स्त्रीत्वपुंस्त्वानि। अत तत्संबन्धादात्मनि लिङ्गसंबन्ध इति भाव।

तादृशेति। ननु प्राणादिषु देहातिरिक्तेषु कथं पुंस्त्वादिकम्। प्राणादिशब्दगतमिति चेत्–तथा आत्मज्ञानादिपदेष्वपि सुवचमिति चेत्; लोके स्त्रीषु वाचः, पुरुषेषु प्राणाख्यबलस्य, क्लीबे अशक्तमनसश्चोद्रेकदर्शनात् तादृशस्त्रीपुरुषादिविवक्षया वागादिपदप्रयोगात्।

केन गन्धानिति । प्राणेनेति ॥ ६० ॥

केन रूपाणीति । चक्षुषेति । केन शब्दानिति । श्रोत्रेणेति । केन रसानिति । जिह्वयेति । केन कर्माणीति । हस्ताभ्यामिति ।

केन सुखदुःखे इति । शरीरेणेति ॥ ६१ ॥ केनाऽऽनन्दं रतिं प्रजातिमिति । उपस्थेनेति ॥६२॥ केनेत्या इति । पादाभ्यामिति ॥६३
केन धियो विज्ञातव्यं कामानिति ॥ ६४ ॥
प्रज्ञयेति [प्र] ब्रूयात् ॥ ६५ ॥
तमाह—आपो वै खलु मे ह्यसावय ते लोक इति ॥ ६६ ॥

सा या ब्रह्मणो जितिः या व्यष्टिः, तां जितिं जयति तां व्यष्टिं व्यश्नुते, य एवं वेद य एवं वेद ॥ ६७ ॥

इति कौषीतक्युपनिषदि प्रथमोऽध्यायः ।

प्राणादीनां तृतीयानिर्देशेन करणत्वप्रतीतेः स्वस्य कर्तृत्वप्रतीतेश्च मनोवाक्प्राणव्यतिरेकः सिद्धः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ५९ ॥

प्राणेनेति । प्राणेन गन्धान् जानामीति ब्रूयादित्यर्थः । एवमुत्तरत्रापि यथायोग्यमन्वयः तत्तदिन्द्रियव्यतिरेकश्च बोध्यः ॥ ६० ॥

शरीरेणेति । 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः इति श्रुतेः वैषयिकसुखदुःखयोः शरीरहेतुकत्वात् शरीरस्य च करणतया निर्देशः ॥ प्रजातिः प्रजननम् ॥ ६२ ॥ इत्याः गमनानीत्यर्थः ॥ ६३ ॥ ज्ञातव्यं कामान्–ज्ञानविषयान् इच्छाविषयांश्चेत्यर्थः । ज्ञानेच्छादिकं केनाप्नोषीति पर्यवसितोऽर्थः ॥ ६४ ॥ प्रज्ञया मनसेत्यर्थः ॥ ६५ ॥ तमाह .. लोकोऽमौ अमृतस्य(?)आपो भुज्यन्ते । तवाप्यसौ लोको भोग्य इत्यर्थः ॥

सा या .. य एव वेद । अत्र वेदशब्दः उपासनपरः । उक्तपर्यङ्कविद्यानिष्ठो यः, स जितिं जयं व्यष्टिं योगञ्च लभते इत्यर्थः ।

यत्तत्र परे —'पुण्यपापे विधूय निरञ्जन परम साम्यमुपैति' इति श्रुताया परमसाम्यापत्तौ निरञ्जनस्य गमनासम्भवात् परमसाम्यापत्ते देशान्तरप्राप्त्यनपेक्षत्वाच्च देवयानस्य पथो नार्थवत्त्वम् । आत्मैकत्व दर्शिनामाप्तकामानामिहैव दग्धाशेषक्लेशबीजानाम् आरब्धदेहकर्माशय क्षपणव्यतिरेकेणापेक्षितव्याभावात् । पर्यङ्कविद्यादिषु तु पर्यङ्कारोहणब्रह्म गन्धप्रवेशादीना विशिष्टदेशान्तरप्राप्तिसापेक्षत्वात् तत्रैव पन्था अपेक्षित । न हि ग्रामप्राप्तावपेक्षित पन्था आरोग्यप्राप्तावपेक्षित इति, ' गतेरर्थ वत्त्वमुभयथाऽन्यथा हि विरोध ", "उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्" इति सूत्राभ्या प्रतिपादितमिति । तथा, 'एवमेवास्य परिद्रष्टु इमाष्षोड-शकला पुरुषायणा पुरुष प्राप्यास्त गच्छन्ति' इति श्रुते ब्रह्मविद् प्राणाना ब्रह्मण्येव लय । 'गता कला पञ्चदश प्रतिष्ठा' इति कलाना पृथिव्यादिस्वप्रकृतौ लयप्रतिपादन तु लौकिकदृष्ट्यभिप्रायमिति कला प्रलयाधिकरणे स्थितम् । सोऽपि कलाप्रलयो निरवशेष इति, भिद्येते तासा नामरूपे पुरुषे, 'स एषोऽकलोऽमृतो भवति' इति, 'अविभागो वचनात्" इत्यत्र प्रतिपादितम् । अतो न मुक्तस्यार्चिरादिमार्गेण गमनमित्युक्तम् —

तत्र—तथासति, "अनियम सर्वेषामविरोध " इत्यधिकरणे— उपकोसलविद्याया पञ्चाग्निविद्यायाञ्चार्चिरादिगतेराम्नानात् तद्विद्या निष्ठानामेवार्चिरादिगति , नान्येषामिति पूर्वपक्ष कृत्वा, 'ये इत्थ विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते' इति श्रद्धातपश्शब्दलक्षित ब्रह्मविद्यान्तरनिष्ठानामप्यर्चिरादिगतिश्रवणात् , 'शुक्लकृष्णे गती ह्येते जगत शाश्वते मते । एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुन ' इति अनुमान

शब्दितात् स्मरणाच्च सर्वविद्यासाधारण्यमाश्रयणीयम्, उपकोसलविद्याया पञ्चाग्निविद्यायाश्च द्विराम्नानस्योभयत्रानुचिन्तनार्थत्वेनाप्युपपत्तेरिति अर्चिरादिगते सर्वविद्यासाधारण्यम्, "अनियमः सर्वेषामविरोधश्शब्दानुमानाभ्याम्" इत्यधिकरणे प्रतिपादितमिति परैरप्युक्तत्वात् तद्विरोध ।

न च सकलसगुणविद्यासाधारण्यमेवास्मिन्नधिकरणे प्रतिपादितम्, न तु निर्गुणविद्यासाधारण्यमिति वाच्यम्, निर्गुणविद्याया एवाप्रामाणिकत्वात् । 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोन्तर्हृदय आकाशस्तस्मिन् छेते' इति बृहदारण्यकषष्ठाध्यायगताया निर्गुणविद्यात्वेन पराभिमताया. दहरविद्याया छान्दोग्यगतसगुणविद्यैक्यस्य हृदयायतनत्वसेतुत्वलोकासम्भेदहेतुत्वादिसामान्येन, "कामादीतरत्र तत्र चायतनादिभ्यः" इत्यधिकरणे सूत्रकृतैव समर्थितत्वात् । परैरपि तथा व्याख्यातत्वाच्च । न च निर्गुणायामपि विद्याया ब्रह्मस्तुत्यर्थमेव सगुणविद्यासम्बन्धिगुणोपसंहारः सम्भवतीति वाच्यम्—निर्गुणस्य परस्य ब्रह्मणो गुणवत्त्वेन अवरब्रह्मत्वेन प्रतिपादनस्य प्रत्युत निन्दात्वेन स्तुतित्वासंभवात् । अत एव, "व्यतिहारो विंशिषन्ति हीतरवत्" इत्यत्र, 'तद्योऽहं सोऽसौ योऽसौ सोऽहं त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते' इत्यत्र संसारिण ईश्वरत्वचिन्तने, 'ब्रह्मदृष्टिरुत्कर्षात्" इति न्यायोऽनुगृहीतो भवति । ईश्वरस्य संसार्यात्मत्वचिन्तने निकर्ष प्रसज्येत । अतो द्विरूपा मतिर्न कर्तव्येति पूर्वपक्षं कृत्वा, 'आम्नानबलात् द्विरूपाऽपि मतिः कर्तव्या ॥ नन्वेवमुत्कृष्टस्यापि निकर्षप्रसङ्ग इत्युक्तम् ॥ तत् किमिदानीं सगुणे ब्रह्मण्युपा

समाने तस्य वस्तुतो निर्गुणस्य निकृष्टता भवति ॥ ननु कस्मैचित् फलाय निर्गुणस्य गुणवत्तया ध्यानमात्रं क्रियते । न तावता तस्य निकृष्टता भवतीति चेत् इहापि व्यतिहारानुचिन्तनमात्रमुपदिश्यते फलाय, न तु निकृष्टता भवत्युत्कृष्टस्य' इत्येवं निर्गुणस्य सगुणत्वे निकर्षप्रसक्तिमभ्युपेत्य, वस्तुतो निकर्षो नास्तीति शङ्करभाष्यवाचस्पत्योर्व्याहतत्वेन निन्दावहस्य गुणकीर्तनस्य स्तुत्यर्थत्वासंभवात् । किञ्च लोके हि स्तुतिर्विधेयरुच्युत्पादनेन सप्रयोजना । न चात्र निर्गुणस्य तज्ज्ञानस्य वा विधेयत्वमस्ति । न वा गुणवत्त्वेन स्तुतेर्निर्गुणप्रतिपत्त्युपयोगोऽस्ति । किञ्च निर्गुणविद्याम्नातवशित्वादिगुणानां न छान्दोग्यगत सगुणविद्यायाम् आध्यानायोपसंहारसंभव । 'यत्र वशित्वादय श्रूयन्ते, तत्रापि तेषा ध्येयत्वेना(त्वान ?)भिधानात् अन्यत्र गतानामपि न ध्येयत्वं संभवति' इति तैरेवोक्तत्वात् । स्तुत्यर्थत्वमपि न संभवति, सत्यकामत्वादिसामर्थ्यादेव सर्वेश्वरत्वसिद्ध्या स्तुते सिद्धत्वेन सत्यकामत्वान्तर्भूतवशित्वकीर्तनेन स्तुतेरसंभवात् । कठवल्लीषु पराभिमतनिर्गुणब्रह्मप्रकरणे, 'शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति' इति उत्क्रान्तिगत्यो· प्रतिपादनात् । निर्गुणविद्यात्वेन पराभिमतायां भूमविद्यायाम्, 'स एकधा भवति त्रिधा भवति' इति अनेकशरीरपरिग्रहश्रवणेन निर्विशेषब्रह्मभावापत्तेरप्रतिपादनात् । न चास्य वाक्यस्य सगुण विद्यासु उत्कर्ष कल्पनीय इति वाच्यम् —'सर्वं ह पश्य· पश्यति सर्वमाप्नोति सर्वश ' इति प्राक्प्रस्तुतस्यैव, 'स एकधा भवति'

इति तच्छब्देन परामर्शेन तथोत्कर्षकल्पने प्रमाणाभावात् । तथा निर्गुणविद्यात्वेन पराभिमतप्रजापतिविद्यायाम्, 'एष संप्रसादो ऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति शरीरादुत्क्रान्तेः श्रवणात् । न च शरीरात् समुत्थानं शरीरविविक्तात्मसाक्षात्कार इति वाच्यम्—'अशरीरो वायुरभ्रं विद्युत् स्तनयित्नुः अशरीराणि । यथैतान्यमुष्मादाकाशात् समुत्थाय परं ज्योतिरुप संपद्य स्वेन रूपेणाभिनिष्पद्यन्ते' इति दृष्टान्तानुगुण्येनैव दार्ष्टान्तिकेऽप्यर्थस्य वर्णनीयत्वात् शरीरविविक्तात्मसाक्षात्कारस्यापदार्थत्वादवाक्यार्थत्वात् । तथा निर्गुणविद्यात्वेनाभिमतसद्विद्यायाम्, 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति प्रारब्धावसाने ब्रह्मसंपत्तिमुक्त्वा तदुत्तरखण्डे, 'यदाऽस्य वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्' इति ब्रह्मसंपत्त्यर्थतया उत्क्रान्तेः प्रतिपादितत्वाच्च । तथा वाजसनेयके षष्ठे तदभिमतनिर्गुणविद्यायामेव, "अणुः पन्था विततः पुराणो मां स्पृष्टोऽनुवित्तो मयैव । तेन धीरा उपयन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः' इति गतिप्रतिपादनाच्च । "समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य" इति विद्वदविदुषोरुत्क्रान्तिसाम्यस्य सूत्रकृता कण्ठत एव प्रतिपादितत्वाच्च अर्चिरादिगतिः सगुणविद्याविषयेत्येतन्न प्रामाणिकानां हृदयमधिरोहति । "कार्यं बादरिरस्य गत्युपपत्तेः" इति नित्यपरब्रह्मविद एवार्चिरादिगतिरिति बादरिमतस्य, "परं जैमिनिर्मुख्यत्वात्" इति परब्रह्मोपासकानामर्चिरादिगतिरिति जैमिनिमतापेक्षया प्राङ्निर्दिष्टस्य सिद्धान्तसूत्रत्वायोगात् । "चरणादिति चेन्न तदुपलक्ष-

णार्थेति कार्ष्णाजिनि ", "सुकृतदुष्कृते एवेति तु बादरि ", "उत्क्रमिष्यत एवम्भावादित्यौडुलोमि ", 'अवस्थितेरिति काशकृत्स्न ", 'स्वामिन फलश्रुतेरित्यात्रेय ", "आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते" इत्यादिषु सर्वत्र पाश्चात्यस्यैव सूत्रकृदभिमतत्वदर्शनेन, "कार्यं बादरिरस्य गत्युपपत्ते ' इति बादरिमतस्य सिद्धान्तसूत्रत्वाभ्युपगमस्या सगतत्वात् । निर्विशेषब्रह्मभावस्यैव मुक्तिरूपत्वे, "सकल्पादेव तच्छ्रुते " "अभाव बादरिराह ह्येवम् ', "भाव जैमिनिर्विकल्पामननात्", "द्वादशाहवदुभयविध बादरायणोऽत " इत्यादीनाम्, "अनावृत्तिश्शब्दात् " इत्यन्तानामर्थशून्यतैव स्यात् । न च, "सकल्पादेव तच्छ्रुते " इति सूत्रे, "इत उपरि सगुणविद्याफलप्रपञ्च ' इति कल्पतरुकारेणोक्तत्वात् सर्वं सगुणविद्याफलभूतावान्तरमुक्तिविषयमिति वाच्यम्—यदि हि मुक्तिद्वैविध्य सूत्रकृदभिमत स्यात्, तर्हि, 'य आत्मा अपहतपाप्मा' इत्यादिमुक्तौ ब्राह्मरूपाविर्भाववाक्यमवान्तरमुक्तिपरम्, 'एव वा अरेऽयमात्मा अनन्तरोऽबाह्य कृत्स्न प्रज्ञानघन एव' इति निरस्ताशेषप्रपञ्चबोधात्मकत्वेन स्वेन रूपेण निष्पत्तिप्रतिपादक वाक्य तु परममुक्तिपरमिति व्यवस्थाया सुवचतया व्यावहारिकपारमार्थिकत्वाभ्या व्यवस्थाप्रतिपादकत्वेन त्वदभिमतस्य, "एवमप्युपन्यासात् पूर्वभावादविरोध बादरायण " इति सूत्रस्यासगतिप्रसङ्गात् । तथा, 'अशरीर वाव सन्त न प्रियाप्रिये स्पृशत " इति अशरीरत्वप्रतिपादक वाक्य परममुक्तिपरम्, 'स एकधा भवति त्रिधा भवति' इति शरीरयोगप्रतिपादक वाक्यमवान्तरमुक्तिपरमिति व्यवस्थाया वक्तु सुशकत्वेन सत्यामिच्छाया सशरीरत्वम्,

अन्यदा अशरीरत्वमिति व्यवस्थाप्रतिपादकत्वेन त्वदभिमतस्य "द्वादशाहवदुभयविधं बादरायणोऽत." इति सूत्रस्यासंगतिप्रसङ्गात् । "अत एव चानन्याधिपतिः" इति सूत्रे, "अत एव=सत्यसङ्कल्पत्वात् च शब्दोक्तायाः 'स स्वराड्भवति' इति श्रुतेश्चानन्याधिपतिर्मुक्तो भवति ; नास्यान्योऽधिपतिर्भवतीत्यर्थः । इदमपि सगुणोपासनया हिरण्यगर्भं प्राप्तस्य" इति यत् परैरुक्तम्–तत् अत्यन्तासंगतम्–तस्य हिरण्यगर्भेश्वररूपाधिपतिसत्त्वेनानन्याधिपतित्वस्य वक्तुमशक्यत्वादित्यलमतिचर्चया । प्रकृतमनुसरामः ॥ ६७ ॥

इति कौषीतक्युपनिषत्प्रथमाध्यायप्रकाशिका ।

अथ कौषीतक्युपनिषदि द्वितीयोऽध्यायः

प्राणो ब्रह्मेति ह स्माह कौषीतकिः । तस्य ह वा एतस्य प्राणस्य

द्वितीयाध्यायपरिष्कारः

[द्वितीयस्याध्यायस्य भाष्याभावात् मूलमात्रस्य परिष्कारः क्रियते ।]

प्राणमाहात्म्यमत्र द्वितीयेऽध्याये प्रतिपाद्यते । वाक्प्राणमनश्चक्षुःश्रोत्राणां पञ्चानामुपासनोपकरणतया प्राधान्येन परिग्रहः केनाद्युपनिषत्सु प्रसिद्ध इति सद्विद्यास्माभिर्दर्शितमस्ति । इहापि कौषीतक्युपनिषदि तत्पकारेण तत्र प्राणस्य प्राधान्यमन्यथैव प्रतिपाद्यते । तद्ग्रहणानुगुण वाक्यानि कानिचिदुपासनान्युपदिश्यन्ते । तत्र प्राणयत् परिहरणेन अयाच्यत्वसिद्धिफलकं प्राणे ब्रह्मदृष्टिरूपमुपासनं तत्सम्बन्धिनमनं द्विप्रकारमुच्यते प्राणो ब्रह्मेतीति । प्राणो राजस्थाना-

ब्रह्मणो मनो दूतं चक्षुर्गोप्तृ श्रोत्रं संश्रावयितृ वाक् परिवेष्ट्री । स यो ह वा एतस्य प्राणस्य ब्रह्मणो मनो दूतं वेद, दूतवान् भवति । यश्चक्षुर्गोप्तृ, गोप्तृमान् भवति । यः श्रोत्रं संश्रावयितृ, संश्रावयितृमान् भवति । यो वाचं परिवेष्ट्रीम् परिवेष्ट्रीमान् भवति। तस्मै वा एतस्मै प्राणाय ब्रह्मण एताः सर्वा देवता अयाचमानाय बलिं हरन्ति । एवं हैवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति, य एवं वेद । तस्योपनिषत्, न याचेदिति । तद् यथा ग्रामं भिक्षित्वाऽलब्ध्वोपविशेत्, नाहमतो दत्तमश्नीयामिति । त एवैनमुपमन्त्रयन्ते, ये पुरस्तात् प्रत्याचक्षीरन् । एष धर्मोऽयाचतो भवति । अन्नदास्त्वेवैनमुपमन्त्रयन्ते, ददाम त इति ॥ १

प्राणो ब्रह्मेति ह स्माह पैङ्ग्यः । तस्य ह वा एतस्य प्राणस्य ब्रह्मणो वाक् परस्तात् चक्षुरारुन्धे , चक्षुः परस्ताच्छ्रोत्रमारुन्धे , श्रोत्रं परस्तान्मन आरुन्धे , मनः परस्तात् प्राण आरुन्धे , तस्मै वा एतस्मै प्राणस्य ब्रह्मण एताः सर्वा देवता अयाचमानाय बलिं हरन्ति । एवं हैवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति, य एवं वेद । तस्योप

यत्र. मनआदि च तत्परिजनस्थानीयमिति ब्रह्मत्वेन हृदयस्य प्राणस्य मनआदिदूतत्वादिना द्रष्टव्यम् । परिवेष्ट्री परिवेषणकर्त्री । बलिं हरन्तीति । छान्दोग्यादौ (५) 'यदहं वसिष्ठास्मि त्वं तद्वसिष्ठोऽसि' इत्येव वागादिभिः स्वस्वगुणार्पणं प्राणे क्रियमाणं द्रष्टव्यम् । (१)

कौषीतकिना ब्रह्मदर्शनमुक्तम् । पैङ्ग्यमतेन तत्कथ्यते । वाक् परस्तादित्यत्र विभक्तिव्यत्ययो द्रष्टव्यः । वाचमतिशेते चक्षुः । वाचोक्तोऽर्थः चक्षुषा दृष्टः सन् प्रत्ययदार्ढ्यं भवति, वाचः कर्मेन्द्रियत्वात् चक्षुषः ज्ञानेन्द्रियत्वाच्च । चक्षुरतिशेते श्रोत्रम् ।

अन्यदा अशरीरत्वमिति व्यवस्थाप्रतिपादकत्वेन त्वदभिमतस्य "द्वादशाहवदुभयविधं बादरायणोऽत." इति सूत्रस्यासंगतिप्रसङ्गात् । "अत एव चानन्याधिपतिः" इति सूत्रे, "अत एव=सत्यसङ्कल्पत्वात् च शब्दोक्ताया, 'स स्वराड्भवति' इति श्रुतेश्चानन्याधिपतिर्मुक्तो भवति ; नास्यान्योऽधिपतिर्भवतीत्यर्थः । इदमपि सगुणोपासनया हिरण्यगर्भं प्राप्तस्य" इति यत् परैरुक्तम्–तत अत्यन्तासंगतम्–तस्य हिरण्यगर्भेश्वररूपाधिपतिसत्त्वेनानन्याधिपतित्वस्य वक्तुमशक्यत्वादित्यलमतिचर्चया । प्रकृतमनुसरामः ॥ ६७ ॥

इति कौषीतक्युपनिषत्प्रथमाध्यायप्रकाशिका ।

अथ कौषीतक्युपनिषदि द्वितीयोऽध्यायः

प्राणो ब्रह्मेति ह स्माह कौषीतकिः । तस्य ह वा एतस्य प्राणस्य

द्वितीयाध्यायपरिष्कारः

[द्वितीयस्याध्यायस्य भाष्याभावात् मूलमात्रस्य परिष्कारः क्रियते ।]

प्राणप्राधान्यमत्र द्वितीयेऽध्याये प्रतिपाद्यते । वाक्घ्राणमनश्चक्षुःश्रोत्राणां पञ्चानामुपासनोपकरणतया प्राधान्येन परिग्रहः केनाद्युपनिषत्सु प्रसिद्ध इति बहुशास्त्राभिर्दर्शितमस्ति । इहापि कौषीतक्युपनिषदि तत्परिष्कारेण तत्र प्राणस्य प्राधान्यमन्यत्रेव प्रतिपाद्यते । तद्ग्रहणानुगुण रम्याणि कानिचिदुपासनान्युपदिश्यन्ते । तत्र प्राणवत् बलिहरणेन आराध्यत्वसिद्धिफलकं प्राणे ब्रह्मदृष्टिरूपमुपासनं तत्तन्मुनिमतं द्विप्रकारमुच्यते प्राणो ब्रह्मेतीति । प्राणो राजस्थाना-

निषत्, न याचेदिति। तद् यथा ग्रामं भिक्षित्वाऽलब्ध्वोपविशेत्, नाहमतो दत्तमश्नीयामिति, त एवैनमुपमन्त्रयन्ते, ये पुरस्तात् प्रत्याचक्षीरन्। एष धर्मोऽयाचतो भवति, अन्नादास्त्वेवैनमुपमन्त्रयन्ते, ददाम त इति ॥२॥

अथात एकधनावरोधनम्, यदेकधनमभिध्यायात्, पौर्णमास्यां वाऽमावास्यायां वा शुद्धपक्षे वा पुण्ये नक्षत्रे एतेषामेकस्मिन् पर्वण्यग्निमुपसमाधाय परिसमूह्य परिस्तीर्य पर्युक्ष्य दक्षिणं जान्वाच्य स्रुवेणाज्याहुतीर्जुहोति, 'वाङ्नाम देवताऽवरोधनी सा मेऽमुष्मादिदमवरुन्ध्यात् तस्यै स्वाहा', 'चक्षुर्नाम देवताऽवरोधनी सा मेऽमुष्मादिदमवरुन्ध्यात् तस्यै स्वाहा', 'श्रोत्रं नाम देवताऽवरोधनी सा मेऽमुष्मादिदमवरुन्ध्यात् तस्यै स्वाहा', 'मनो नाम देवताऽवरोधनी सा मेऽमुष्मादिदमवरुन्ध्यात् तस्यै स्वाहा', 'प्रज्ञा नाम देवताऽवरोधनी सा मेऽमुष्मादिदमवरुन्ध्यात् तस्यै स्वाहा' इति। अथ धूमगन्धं प्रजिघ्राय आज्यलेपेनाङ्गान्यनुविमृज्य वाचंयमोऽभिप्रव्रज्यार्थं ब्रूयात्, दूतं वा प्रहिणुयात्, लभते हैव ॥३॥

'चक्षुर्वित्तं मानुषम्, श्रोत्रं दैवम्' इत्युक्तरीत्या आमुष्मिकस्य सर्वस्य श्रोत्रग्राह्यवेदैकवेद्यत्वात्। मनस्तु सर्वग्राहि ततोऽधिकम्। इन्द्रियाणां प्राणाधीनस्थितिप्रवृत्तिकत्वात् प्राणः श्रेष्ठः। (२)

प्राणादिदेवतोद्देश्यकहोमाद्यनुष्ठानेन रिक्तस्य धनिकधनप्राप्तिसोलभ्यमुपवर्ण्यते अथात एकधनावरोधनमिति। एकस्य=कस्यचिदन्यस्य यत् धनम्, तस्यावरोधनम् स्वप्रयत्नेन संग्रहः। अत्र प्रागुक्तेन वागादिना सह प्रज्ञाऽपि काचिद् देवतात्वेनोक्ता। एतेषामेकस्मिन् पर्वणि इति। उक्तानां मध्ये कस्मिंश्चित् काले इत्यर्थः। अर्थं ब्रूयात् इति। साक्षादिति शेषः। स्वयं वा साक्षात् धनिकसविधे ब्रूयात् दूतं वा प्रेषयेदिति। (३)

अथातो दैव स्मर —यस्य प्रियो बुभूषेत् , यस्यै वा, येषा वा, यासा वा, एतेषामेवैकस्मिन् पर्वण्येतयैवाऽऽवृता एता आज्याहुती जुहोति, 'वाच ते मयि जुहोम्यसौ स्वाहा', 'चक्षुस्ते मयि जुहोम्यसौ स्वाहा', 'श्रोत्र ते मयि जुहोम्यसौ स्वाहा', 'मनस्ते मयि जुहोम्यसौ स्वाहा,' 'प्रज्ञा ते मयि जुहोम्यसौ स्वाहा' इति । अथ धूमगन्ध प्रजिघ्रायाज्यलेपेनाङ्गान्यनुविमृज्य वाचयमोऽभिप्रव्रज्य सस्पर्श जिगमिषेत्, अपि वाताद्वा तिष्ठेत् सभाषमाण , प्रियो हैव भवति, स्मरन्ति हैवास्य ॥४॥

अथात सयमन प्रातर्दनमान्तरमग्निहोत्रमित्याचक्षते— यावद्वै पुरुषो भाषते, न तावत् प्राणितु शक्नोति। प्राण तदा वाचि जुहोति। यावद्वै पुरुष प्राणिति, न तावद्भाषितु शक्नोति, वाच तदा प्राणे जुहोति । एते अनन्ते अमृते आहुती जाग्रच्च स्वपश्च सतत जुहोति ।

प्राणादिदेवतोद्देश्यकहोमबलेन परेषा स्वस्मिन् प्रीतिपूर्वकस्मरणसिद्धिरुच्यते । अथातो दैव स्मर इति । परे स्वस्मिन् स्वय प्रीत्यकरणेऽपि प्राणादिदेवकल्पिता भवति प्रीतिरिति अय दैव स्मर। कामो वा काममूलकस्मरण वा । आवृता = उक्तप्रकारेण वाच ते इति । ते इति वशीकार्य पर उच्यते । (४)

अथोक्तप्राणादिपञ्चकमध्ये प्राणस्य वाचश्च परस्परस्मिन् होम भावनया अग्निहोत्रसपत्ति प्रदर्श्यते । अग्निहोत्रदेवतयोर्मध्येऽपि सूर्यस्याग्नौ रात्रौ, अग्ने सूर्ये च दिवा प्रवेश प्रसिद्ध । सयमन प्रातर्दनमिति । प्रतर्दनाख्येन राज्ञा दृष्ट ध्यानमित्यर्थ । जागरकाले व्याहरमाण प्राण किञ्चिदवध्यैव व्याहर्तु पारयति । यदा न व्याहरणप्रसक्ति , तदैव प्राणो यथावदुच्छ्वासनि श्वासौ करोतीति

अथ या अन्या आहुतयोऽनन्तवत्यः, ताः कर्ममय्यो हि भवन्ति । तद्ध स्मैतत् पूर्वे विद्वांसोऽग्निहोत्रं न जुहवाञ्चक्रुः ॥ ५ ॥

उक्थं ब्रह्मेति ह स्माह शुष्कभृङ्गारः । तद् ऋगित्युपासीत । सर्वाणि हास्मै भूतानि श्रैष्ठ्यायाभ्यर्च्यन्ते । तद् यजुरित्युपासीत । सर्वाणि हास्मै भूतानि श्रैष्ठ्याय युज्यन्ते । तत् सामेत्युपासीत । सर्वाणि हास्मै भूतानि श्रैष्ठ्याय संनमन्ते । तत् श्रीरित्युपासीत, तद् यश इत्युपासीत, तत् तेज इत्युपासीत । तद् यथैतत् श्रीमत्तमं यशस्वितमं तेजस्वितममिति शस्त्रेषु भवति, एवं हैव स सर्वेषु भूतेषु श्रीमत्तमो यशस्वितमस्तेजस्वितमो भवति, य एवं वेद । तदेतदैष्टिकं कर्ममयमात्मानमध्वर्युः संस्करोति ; तस्मिन् यजुर्मयं प्रवयति ; यजुर्मये ऋङ्मयं

तदा तदा एकस्यान्यत्र हुतत्वम् । स्वापकाले वागादीनां प्राणे विलयश्च प्रसिद्धः । *या अन्या आहुतय* इति । बाह्यानां सायं प्रातश्च कदाचिदेव भावात् नक्तंदिवं संततत्वाभावात् अन्तवत्त्वं स्पष्टम् । अतिशयितफलत्वाच्चेदमान्तरमग्निहोत्रं श्रेयः । तद्धेति । बाह्याग्निहोत्रात् अस्यातिशयितत्वादित्यर्थः । ऐतरेयेऽपि श्रूयते एवम् । (५)

प्राणादिपञ्चके प्रशस्ततया प्रसिद्धो मुख्यप्राणः शास्त्रेषु अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानरूपेषु प्रशस्तं यदुक्थाख्यं शस्त्रम् तद्रूपेण ऐतरेयादौ श्रुतः । अतः प्राणमेवोक्थमिति गृहीत्वा तत्र ब्रह्मदृष्टिः श्रैष्ठ्यादिफलिका प्रतिपाद्यते उक्थमिति । शुष्कभृङ्गार इति कश्चिदृषिः । अभ्यर्च्यन्ते, युज्यन्ते, संनमन्ते, इति विभिन्नधातुप्रयोगः ऋग्यजुस्सामपदावयवार्थानुगमप्रदर्शनाय । तद् यथैतदिति । प्रसिद्धं हि स्तोत्रशस्त्रे सोमयागाङ्गभूते । प्रगीतमन्त्रसाध्य = गुणिनिष्ठगुणा-

होता ; ऋच्यये साममध्युद्गाता । स एष त्रय्यै विद्याया आत्मा ; एष उ एवैतदिन्द्रस्यात्मा भवति य एवं वेद ॥ ६ ॥

अथातः सर्वजितः कौषीतकेस्त्रीण्युपासनानि भवन्ति । सर्वजिद्ध स्म कौषीतकिरुद्यन्तमादित्यमुपतिष्ठते—यज्ञोपवीतं कृत्वोदकमानीय त्रिः प्रसिच्योदपात्रम्, 'वर्गोसि पाप्मानं मे वृङ्धि' इति । एतयैवाऽऽवृता मध्ये सन्तम्, 'उद्वर्गोऽसि पाप्मानं मे उद्वृङ्धि' इति । एतयैवाऽऽवृताऽस्तं यन्तम्, 'संवर्गोऽसि पाप्मानं मे संवृङ्धि' इति । तद् यदहोरात्राभ्यां पापमकरोत्, सं तद् वृङ्क्ते । तथो एवैवं विद्वान् एतयैवाऽऽवृताऽऽदित्यमुपतिष्ठते, यदहोरात्राभ्यां पापं करोति, सं तद् वृङ्क्ते ॥ ७ ॥

मिधानं स्तोत्रम्, अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रमिति। तेषु नैरन्धिषेषु यथा एतत् उक्थं श्रीमत्तमत्यादिमत्, तथा अयमुपासकः सर्वेषु भूतेषु श्रीमत्तमत्वादिमान् भवतीत्यर्थः । अध्वर्योहोतुरुद्गातुश्च क्रमात् यजुर्वेदर्ग्वेदसामवेदसंबन्धित्वात् तत्तद्विषये यजुर्मयाद्युक्तिः । प्रवयति=प्रकर्षेण संतनोति । (६)

'आदित्यो ह वै बाह्यः प्राण उदयति एष ह्येनं चाक्षुषं प्राणमनुगृह्णानः' (३) इति प्रश्नोपनिषदुक्तरीत्या प्राणादित्यैक्यात् आदित्यविषयकमुपासनमुच्यते अथातः सर्वजित इति । आदित्योपस्थानादीनां वक्ष्यमाणानां सर्वेषामन्ततः प्राणरक्षणार्थत्वाद्वा प्राणाध्याये एतत्सर्वोक्तिरिति ध्येयम् । तत्र वर्गोद्वर्गसंवर्गमन्त्रैः क्रमेण प्रातर्मध्ये सायञ्चादित्योपस्थानमहोरात्रकृतपापवर्जनफलकम्। तद्विषयक कौषीतक्यनुष्ठानं दर्शयति सर्वजिदिति । सं तद् वृङ्क्ते । कौषीतकिरिति शेषः । अतः शिष्टानुष्ठानात् सर्वैरिदमनुष्ठेयमित्याह तथेति । (७)

अथ मासिमास्यमावास्यायां वृत्तायां पश्चाच्चन्द्रमसं दृश्यमानमुपतिष्ठेतैतयैवाऽऽवृता हरिततृणे वा [वं] प्रत्यस्यति, 'यन्मे सुसीमं हृदयं दिवि चन्द्रमसि श्रितम् । मन्येऽहं मा तद्विद्वांसं माऽहं पुत्र्यमघं रुदम्' इति । न ह्यस्मात् पूर्वा प्रजा प्रैति । इति नु जातपुत्रस्य ॥ अथाजातपुत्रस्य—'आप्यायस्व समेतु ते,' 'सं ते पयांसि समु यन्तु वाजा,' 'यमादित्या अंशुमाप्याययन्ति' इत्येतास्तिस्र ऋचो जपित्वा,

---

'आपोमयः प्राणः' इति प्राणस्याप्मयत्वं श्रुतम् । सोमस्य च तत् प्रसिद्धम् । तथा सोमनामभिः प्राणस्याऽऽमन्त्रणञ्च दृष्टम्, 'बृहन् पाण्डरवासः सोमराजन्' इति । प्राणादित्ययोरैक्यात् सोमस्यादित्याप्याय्यमानत्वाच्च प्राणसोमैक्यं भवितुमर्हति । अतः सोमोपासनमुच्यते । तत्र जातपुत्रस्य स्वमरणात् प्राक् पुत्रामरणफलकं प्रथमम्, अजातपुत्रस्य स्वाप्यायनफलकं द्वितीयम् । पश्चादिति प्रतीच्यामित्यर्थः । इदञ्च शुक्लपक्षे द्वितीयायां चन्द्रकलादर्शनम् । अत एवाधत्वेऽपि तादात्विककलादर्शनं स्मृत्याचारसिद्धम् । एतयैवावृतेति । पूर्वोक्तरीत्येत्यर्थः । वैकल्पिकं कर्मान्तरमुपस्थानाङ्गमाह हरिततृणे इति । उदपात्रे तृणद्वयप्रत्यसनं कृत्वा चोपतिष्ठेतेत्यर्थः । 'हरिततृणे वाचं प्रत्यस्यति' इति पाठे तु हरिततृणे स्थितस्सन् वक्ष्यमाणमन्त्ररूपां वाचमुच्चारयेदित्यर्थः । न ह्यस्मात् पूर्वा प्रजा प्रैतीति । एतत्प्रजा एतन्मरणात् प्राक् न म्रियत इत्यर्थः । पूर्वं प्रैतीति प्रयोक्तव्ये पूर्वा प्रैतीति कर्तृविशेषणतया पूर्वादिपदप्रयोगोऽपि श्रुतिशैली । इतिन्वित्यादि । जातपुत्रपुरुषकर्तृकोपस्थानप्रकारोऽयम् । अथाजातपुत्रपुरुषकर्तृकमुपस्थानमुच्यत इत्यर्थः । आप्यायस्वेति प्रतीकत्रयगृहीतमृक्त्रयं तावत्–आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम् ।

'माऽस्माकं प्राणेन प्रजया पशुभिराप्याययिष्ठा , योऽस्मान् द्वेष्टि, यञ्च वयं द्विष्म , तस्य प्राणेन प्रजया पशुभिराप्याययस्व' इति । 'ऐन्द्रीमावृतमावर्ते आदित्यस्यावृतमावर्ते' इति दक्षिणं बाहुमन्वावर्तते ॥ ८ ॥

अथ पौर्णमास्यां पुरस्ताच्चन्द्रमसं दृश्यमानमुपतिष्ठेतैतयैवाऽऽवृता, 'सोमो राजाऽसि विचक्षणः पञ्चमुखोऽसि । प्रजापतिर्ब्राह्मणस्त एकं मुखम् , तेन मुखेन राज्ञोऽत्सि , तेन मुखेन मामन्नादं कुरु । राजा त एकं मुखम् , तेन मुखेन विशोऽत्सि, तेन मुखेन मामन्नादं कुरु । श्येनस्त एकं मुखम् , तेन मुखेन पक्षिणोऽत्सि , तेन मुखेन मामन्नादं कुरु । अग्निष्ट एकं मुखम् , तेनेमं लोकमत्सि , तेन मुखेन मामन्नादं कुरु । त्वयि पञ्चमं मुखम् , तेन मुखेन सर्वाणि भूतान्यत्सि , तेन मुखेन मामन्नादं कुरु । माऽस्माकं प्राणेन प्रजया पशुभिरपक्षेष्ठा । योऽस्मान् द्वेष्टि, यञ्च वयं द्विष्म , तस्य प्राणेन प्रजया पशुभिरपक्षीयस्व' इति । दैवीमावृतमावर्त आदित्यस्यावृतमन्वावर्त इति दक्षिणं बाहुमन्वावर्तते ॥९

भवा वाजस्य संगथे ॥ सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः । आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥, यमादित्या अंशुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति । तेन नो राजा वरुणो बृहस्पतिराप्याययन्तु भुवनस्य गोपाः ॥ इति । ऐन्द्रीमित्यादि। इन्द्रवत् आदित्यवच्च आवर्तमानोऽस्मि स्थिर इत्यर्थः ।८

शुक्लपक्षत्रयमदृष्टचन्द्रपत्न्युपस्थानमुक्तम् । तत्र पूर्णिमायां पूर्णचन्द्रोपस्थानमयादत्वफलक्रमाह अथ पौर्णमास्यामिति । पञ्चमुखोऽसीति । सोमस्य, ब्राह्मणराजश्येनाग्निरूपाणि मुखानि स्वमुखञ्चेति पञ्च मुखानि । (९)

अथ संवेशयन् जायायै हृदयमभिमृशेत्, 'यत् ते सुसीमे हृदये श्रितमन्त प्रजापतौ । तेनामृतत्वस्येशाने मा त्वं पुत्र्यमघं निगाः' इति । न ह्यस्मात् पूर्वा प्रजा प्रैतीति ॥ १० ॥

अथ प्रोष्याऽऽयन् पुत्रस्य मूर्धानमभिजिघ्रेत्, 'अङ्गादङ्गात् संभवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतम्' इति ; नामास्य दधाति । 'अश्मा भव परशुर्भव हिरण्यमस्तृतं भव । तेजो (वेदो) वै पुत्रनामासि स जीव शरदः शतम्' इति ; नामास्य गृह्णाति । अथैनं परिगृह्णाति, 'येन प्रजापतिः प्रजाः पर्यगृह्णात् तदरिष्ट्यै तेन त्वा परिगृह्णाम्यसौ' इति । अथास्य दक्षिणे कर्णे जपति, 'अस्मे प्रयन्धि मघवन्नृजीषिन्' इति । 'इन्द्रश्रेष्ठानि द्रविणानि धेहि' इति सव्ये । 'मा छेत्था मा व्यथिष्ठा शतं शरद आयुषो जीवस्व पुत्र ते नाम्ना मूर्धानमभिजिघ्रामि' इति त्रिरस्य मूर्धानमभिजिघ्रेत् । 'गवां त्वा हिङ्कारेणाभिहिङ्करोमि' इति त्रिरस्य मूर्धानमभिहिङ्कुर्यात् ॥ ११ ॥

अथातो दैवः परिमरः—एतद्वै ब्रह्म दीप्यते यदग्निर्ज्वलति ; अथैतन्म्रियते, यन्न ज्वलति । तस्यादित्यमेव तेजो गच्छति ; वायुं

एवं सर्वजितः कौषीतकेरुपासनत्रयमुक्तम् । अथ जायामरणात् प्राक् अपत्यामरणफलं किञ्चिदाह अथ संवेशयन्निति । संवेशयन् संवेक्ष्यन्=संगंस्यमानः । (१०)

नामास्य दधातीति । 'जीव शरदः शतम्' इत्येतदनन्तरं पुत्रनामोच्चारयतीत्यर्थः। प्रोषितागतकर्तृकं पुत्रघ्राणादिकमाह अथेति ।(११)

आधिदैविकाध्यात्मिकप्राणविपर्ययिणीं परिमरभावनां परितो द्वेषिमरणफलामाह अथातो दैव इति । (तै) भृगुवल्ल्याम्, 'ब्रह्मणः

प्राणः । एतद्वै ब्रह्म दीप्यते, यदादित्यो दृश्यते ; अथैतन्म्रियते यन्न दृश्यते । तस्य चन्द्रमसमेव तेजो गच्छति ; वायुं प्राणः । एतद्वै ब्रह्म दीप्यते, यच्चन्द्रमा दृश्यते ; अथैतन्म्रियते, यन्न दृश्यते । तस्य विद्युतमेव तेजो गच्छति ; वायुं प्राण । एतद्वै ब्रह्म दीप्यते, यद् विद्युद् विद्योतते ; अथैतन्म्रियते, यन्न विद्योतते । तस्या दिश एव (वायुमेव) तेजो गच्छति ; वायुं प्राण । ता वा एताः सर्वा देवता वायुमेव प्रविश्य वायौ सृत्वा न मूर्च्छन्ते ; तस्मादेव पुनरुदीरत इत्यधिदैवतम् । अथाध्यात्मम् — ॥ १२ ॥

एतद्वै ब्रह्म दीप्यते, यद्वाचा वदति । अथैतन्म्रियते, यन्न वदति । तस्य चक्षुरेव तेजो गच्छति ; प्राणं प्राणः । एतद्वै ब्रह्म दीप्यते, यच्चक्षुषा पश्यति । अथैतन्म्रियते, यन्न पश्यति । तस्य श्रोत्रमेव तेजो गच्छति ; प्राणं प्राण । एतद्वै ब्रह्म दीप्यते, यच्छ्रोत्रेण शृणोति । अथैतन्म्रियते, यन्न शृणोति । तस्य मन एव तेजो गच्छति; प्राणं प्राण । एतद्वै ब्रह्म दीप्यते, यन्मनसा ध्यायति । अथैतन्म्रियते,

---

परिमरः' इत्यत्राप्येवम्भूतोऽर्थः परिष्कारे द्रष्टव्यः । वायुं प्राण इति । ज्वलनाद्यभावरूपमरणात् पूर्वम् अग्न्यादीनां ज्वलनाद्युपयोगितया स्थितः प्राणो मरणानन्तरं वायौ लीन इत्यर्थः । वायुदेवता अग्न्यादीन् एवं प्राणनव्यापारं तदा त्यजतीत्युक्तं भवति । उदीरते = उद्गच्छन्ति । ईर गतौ । बहुवचनम् । एवमधिदैवतमग्न्यादित्यचन्द्रमोविद्युतां विलय उक्तः । वाग्दर्शनं नाम तद्व्यापारम्य ।

अथाध्यात्मं वाक्चक्षुःश्रोत्रमनसां प्राणे लय उच्यते अथाध्यात्ममिति । वाचा वक्तुमशक्यमपि पश्यति । द्रष्टुमशक्यमपि

यन्न ध्यायति ; तस्य प्राणमेव तेजो गच्छति ; प्राणं प्राणः । ता वा एताः सर्वा देवताः प्राणमेव प्रविश्य प्राणे मृत्वा न मूर्च्छन्ते ; तस्मादेव पुनरुदीरते । तद् यदिह वा एवं विद्वांसमुभौ पर्वतौ अभि प्रवर्तेयातां दक्षिणश्चोत्तरश्च तुस्तूर्षमाणौ, न हैनं स्तृन्वीयाताम् । अथ य एनं द्विषन्ति, यांश्च स्वयं द्वेष्टि, त एवैनं परिम्रियन्ते ॥ १३ ॥

अथातो निःश्रेयसादानम् – एता ह वै देवता अहंश्रेयसे विवदमाना अस्माच्छरीरादुच्चक्रमुः । तद्धाप्राणत् शुष्कं दारुभूतं शिश्ये । अथैनद् वाक् प्रविवेश । तद् वाचा वदत् शिश्य एव । अथैनच्चक्षुः प्रविवेश । तद् वाचा वदत् चक्षुषा पश्यत् शिश्य एव । अथैनच्छ्रोत्रं प्रविवेश । तद्वाचा वदत् चक्षुषा पश्यच्छ्रोत्रेण शृण्वत् शिश्य एव । अथैनन्मनः प्रविवेश । तद्वाचा वदत् चक्षुषा पश्यच्छ्रोत्रेण शृण्वन्मनसा

शृणोति, अप्राप्तश्रवणमप्यन्तश्चिन्तयतीत्याशयेन वागादितेजसां चक्षुरादिषु लयकथनम् । प्राणं प्राण इति । तत्तदिन्द्रियप्रेरणव्यापारः प्राणकृतः तदा पृथङ् न तिष्ठतीति यावत् । (१३)

छान्दोग्यबृहदारण्यकादिप्रसिद्धः प्राणप्राधान्यवाद इहापि क्रियते । एतद्विज्ञानफलञ्च देववत् अमृतत्वम् । "सर्वाभेदान्यत्रेमे" इति सूत्रे अन्यत्रेति इदं कौषीतकिप्रकरणमेव गृहीत्वा छान्दोग्य-बृहदारण्यकश्रुतविधेरैक्यं विचार्य स्थापितम् । परन्तु भावप्रकाशिका-शारीरकशास्त्रार्थदीपिकादौ परानुरोधेनैव वाक्यमिदं कौषीतकि-ब्राह्मणदशमाध्यायगतत्वेन निर्दिष्टमस्ति । तन्नूनं कौषीतकिब्राह्मण-पूर्वभागमेलनेन स्यात् । निःश्रेयसादानम् प्राणादिदेवतानां मध्ये प्राणदेवतया श्रैष्ठ्यस्वीकरणम् । उपवर्ण्यत इति शेषः । अहंश्रेयसे स्वस्येतरापेक्षयोत्कर्षमुद्दिश्य । तद्धाप्राणदिति । तत् शरीरं सर्वासां

ध्यायच्छिश्य एव। अथैनत् प्राणः प्रविवेश। तत् तत एव समुत्तस्थौ। ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वा प्राणमेव प्रज्ञात्मानमभिसंभूय सहैवैतैः सर्वैरस्माच्छरीरादुत्क्रामन्ति। स वायुप्रतिष्ठ (विष्ट) आकाशात्मा स्वरेति। स तद्गच्छति, यत्रैते देवाः, तत् प्राप्य यदमृता देवाः तदमृतो भवति; य एवं वेद ॥ १४ ॥

अथातः पितापुत्रीयम्, संप्रदानमिति चाचक्षते। पिता पुत्रं प्रेष्यन् आह्वयति। नवैस्तृणैरगारं संस्तीर्याग्निमुपसमाधायोदकुम्भं सपात्रमुपनिधायाहतेन वाससा संप्रच्छन्नः पिता शेते। एत्य पुत्र उपरिष्टादभिनिपद्यत इन्द्रियैरिन्द्रियाणि संस्पृश्य। अपि वाऽस्याभिमुखत एवासीत।

निष्क्रान्तत्वात् निष्प्राणं शिश्ये इति। शिश्य एवेति। मुख्यप्राणस्य पुष्कलप्रवेशाभावात् वागादिप्रवेशाधीनव्याहारादिकर्तृत्वेऽपि नोत्थानसमर्थमासीदित्यर्थः। न च सर्वथा मुख्यप्राणसंबन्धाभावे वागादिव्यापार एव कथमिति शङ्क्यम्—सर्वथा प्राणसंबन्धाभावे शवत्वप्रसङ्गात् पुष्कलतत्प्रवेशाभावस्यैवेष्टत्वात्। प्रज्ञात्मानम् स्वकीयप्रज्ञारूपव्यापारनिर्वाहकम्; यद्वा प्रज्ञजीवरूपनिर्वाहकविशिष्टम्। एतैः सर्वैः दर्शनादिव्यापारैः सह। आकाशात्मानः इति, धूमादिमार्गे आकाशस्य निविष्टत्वात्; अवकाशाभावे गमनायोगेन तदपेक्षत्वाद्वा। (१४)

'अथातः संप्रत्तिः' इति बृहदारण्यकोक्तं संप्रत्तिकर्म प्रस्तौति अथातः पितापुत्रीयमिति। एत्येति। पितृसमीपमागत्येत्यर्थः। उपरिष्टादभिनिपद्यते। शयानेन पित्रोत्तानमुखेन स्वदर्शनानुकूलं समीपेऽवनतस्तिष्ठतीत्यर्थः। पक्षान्तरमाह अपिवेति। उपाभिगदः

त्रिशीर्पाणं त्वाष्ट्रमहनम् ॥९॥ अरुन्मुखान् यतीन् सालावृकेभ्य प्रायच्छम् ॥ १० ॥ बह्वीः सन्धा अतिक्रम्य दिवि प्राह्लादीनतृणहम्," अन्तरिक्षे पौलोमान्, पृथिव्या कालकञ्जान् ॥ ११ ॥

तस्य मे तत्र न लोम चामीयत ॥ १२ ॥

तत्क्रतुन्यायेन स्वोपासकस्य पापाश्लेष वक्तु स्वस्य पापाश्लेष दर्शयति **त्रिशीर्षाणम्** अहनम् । त्रिशिरस्क त्वष्टृपुत्र विश्वरूप हतवानस्मि ॥

अरुन्मुखान् प्रायच्छम् । रौतीति रुत् वेद । रुत् मुखे न विद्यते येषा ते अरुन्मुखाः । वेदान्तविमुखान् यतीन् वनश्वविशेषेभ्य खादनाय प्रायच्छम् ॥ १० ॥

बह्वीः अतृणहम् = न हनिष्यामीति कृता बह्वी प्रतिज्ञा अतिक्रम्य दिवि वर्तमानान् प्रह्लादपुत्रान् अतृणहम् । 'तृण (तृदिर ?) हिंसायाम्, इति हि धातु । अन्तरिक्षे **पौलोमान्** पुलोमसुतान्, पृथिव्या कालकञ्जाख्यासुराश्च हिंसितवानस्मि ॥ ११ ॥

स्पष्टनिर्देशोऽस्तु इति चेन्न-स्वात्मप्रशसापरमात्मविशेष्यकोपासनस्य विवक्षितस्य तत्रालाभात् । न च, 'स म आत्मेति विद्यात्' इति वक्ष्यमाणपरमात्मोपासनैकदेशभूत मामिति स्वात्मोपासनमात्रमेवात्रेन्द्रेणोक्तमिति वाच्यम्—तन्मात्रोपासनस्य हितत्वमत्यायोगात् ॥

त्रिशीर्षाणं त्वाष्ट्रमहनमिति । विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत् स्वस्रीयोऽसुराणाम् । तस्य पुरोहितस्य ब्राह्मणस्य वधे ब्रह्महत्यादोषेण भाव्यम् । तदश्लेषो विद्याबलात् ॥ ९ ॥

रौतीति । वक्ति मानान्तरागोचरपरार्थादिकमिति रौतीत्यस्यार्थ । किमिति यतीना साधूना मारणमित्यत्र अरुन्मुखत्वादिति हेतुवर्णनमिदम् । पापप्रयोजकाकारस्तु यति वमेव ॥ १० ॥

स यो मा विजानीयात्, नास्य केन च कर्मणा लोको मीयते ; न मातृवधेन, न पितृवधेन, न स्तेयेन, न भ्रूणहत्यया नास्य पापं (चन) चकृषो मुख नील वेति ॥ १३ ॥
स होवाच, 'प्राणोऽस्मि प्रज्ञात्मा, त मामायुरमृतमित्युपास्स्व ॥ १४ ॥

तस्य अमीयत । एव हिंसितवतो मे लोमापि नाहिंस्यत, ब्रह्मविद्याप्रभावादित्यर्थ ॥ १२ ॥

स यो मां नील वेति । य एतादृशमदात्मानं परमात्मानमुपास्ते, तस्य केनापि कर्मणा मातृवधपितृवधस्तेयभ्रूणहत्यादिलक्षणेन परलोकप्राप्तिर्न विरुद्धचते । एव पाप कृतवतोऽपि, 'मया ईदृश पापं कृतम्' इति निर्वेदजनितमुखवैवर्ण्यमपि नास्तीत्यर्थ । **चकृष** इति तु छान्दसात् षष्ठी ॥ १३ ॥

एव चेतनविशेषरूपस्वविशिष्टपरमात्मोपासनमुक्त्वा अचेतन

स यो मामिति वाक्य वज्रहननादिरहस्यसमानाधिकरण-पापाश्लिष्टयशालीन्द्रशरीरकपरमात्मोपासनपरम् । ननु मातृ-वधेनेत्याद्युक्त मघ किं विद्यापूर्वभावि, उतोत्तरभावि । नाद्य सञ्चिता-नन्तपापप्रणाशकत्वाद् विद्याया कृतिरपराधमात्रनिर्देशाऽनौचि-त्यात् । उत्तरापधविषयत्व एव वाक्यस्वारस्यात् । नान्त्य ; प्रामादिक-मात्रोत्तराघश्लेषस्यैव श्रीभाष्ये भणितत्वेन तद्विरोधादिति चेन्न— अत्र भाष्ये पापाश्लेषप्रयोगेणोत्तराघविषयत्वस्य सूचितत्वात् । परविद्याया. प्रामादिकमात्राश्लेषहेतुत्वमुक्तम् । क्वचित्त वचन-बलात् बुद्धिपूर्वपापाश्लेषकत्वमपि । यथा, पञ्चाग्निविद्यानिष्ठविषये पतितसंसर्गस्य दोषानापादकत्व (५. १०) छान्दोग्ये, 'य एतानेवं पञ्चाग्नीन् वेद, न सह तैरप्याचरन् पाप्मना लिप्यते' इति—तथेह मातृवधादिमहादोषाश्लेषोऽपीति ॥ १३ ॥

आयुः प्राणः । प्राणो वा आयुः, प्राण उ वा अमृतम् । यावद्धि अस्मिन् शरीरे प्राणो वसति, तावदायुः । प्राणेन ह्येवामुष्मिन् लोकेऽमृतत्वमाप्नोति ॥ १५ ॥

विशेषरूपप्राणविशिष्टोपासनमाह **स होवाच...उपास्स्व** प्रज्ञारूप आत्मा **प्रज्ञात्मा** जीवः । जीवशरीरक इत्यर्थः । जीवशरीरकोऽहम् । **प्राणोऽस्मि**—प्राणशरीरकोऽहमस्मि । तादृशं प्राणशरीरकं माम् आयुरमृतमित्युपास्स्व ॥ १४ ॥

कथं प्राणशरीरकस्यायुष्ट्वामृतत्वे इत्याशङ्क्याह **आयुः... आप्नोति।** शरीरे प्राणस्थितेरुच्छ्वासादिलक्षणायुस्साधनत्वादायुः प्राणः । लोकान्तरे चिरस्थायित्वरूपामृतत्वप्राप्तेः प्राणाधीनोपायानुष्ठानसाध्यत्वात् प्राणस्यामृतत्वम् । अत आयुष्ट्वामृतत्वे प्राणस्योपपद्येते । तद्द्वारा परमात्मनश्चोपपद्येते आयुष्ट्वामृतत्वाभ्यां प्राणशरीरकब्रह्मण उपासनमुपपद्यते । यद्वा व्यासार्योक्तरीत्या न **मामायुरिति** वाक्ये **मामिति**

आयुष्ट्वामृतत्वयोः प्राणद्वारैवोपास्ये समन्वयस्यात्र स्पष्टमवगमात् तथैव व्याख्याय व्यासार्यवर्णितमप्याह यद्वेति । अस्मिन् पक्षे, 'प्राणेन ह्यमुष्मिन् लोकेऽमृतत्वमाप्नोति' इति वचनम्, अमृतमित्युपास्स्वेत्युक्तामृतत्वोपपादनपरं नेष्यम् । किंतु आयुः प्राण इत्युक्तायुष्ट्वोपपादनशेषतयैव प्राणे आयुष्ट्वामृतत्वयोः कथनपरं ग्राह्यम् । मुख्यप्राणस्य स्वपरिकरभूतेन्द्रियैः सह ऐश्वर्यरूपैहिकामुष्मिकसर्वपुरुषार्थप्रतिलम्भनायामुत्राप्यनुवर्तमानत्वात् प्राणेनामृतत्वमाप्नोतीत्युच्यते । मोक्षे प्राणस्याननुवृत्तेः जीवस्यैव तत्र भोग्यभोक्तृरूपेण स्थितेः प्रज्ञात्मेत्युक्तप्रज्ञारूपजीवग्रहणेन प्रज्ञया सत्यं सङ्कल्पमेती-

प्रज्ञया सत्य सङ्कल्पमेति ॥ १६ ॥ स यो मामायुरमृतमित्युपास्ते सर्वमायुरस्मिन् लोक एति । आप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके ॥१७॥ तद्धैक आहु एकभूय वै प्राणा गच्छन्तीति ॥ १८ ॥

जीवविशिष्टतोच्यते आयुरिति प्राणविशिष्टता । 'आयु प्राण' इति ह्यनन्तरमेव श्रवणात् आयुरमृतमिति स्वेन रूपेणावस्थिति । अत (एवञ्च) अस्मिन्नेव वाक्ये स्वेन रूपेण चिदचिद्विशिष्टतया च त्रिविधोपासन विधीयते । अतो नोपासनात्रयविधिकृतवाक्यभेद इति द्रष्टव्यम् ॥१५॥

प्रज्ञात्मत्वविशिष्टोपासनस्य फलमाह **प्रज्ञया एति** । अपहत पाप्मत्वादिगुणाष्टकविशिष्ट [त्व ?] लक्षण ब्र(ब्रा ?)ह्मरूपमित्यर्थ ॥

आयुरमृतत्वगुणविशिष्टप्राणोपासनस्य फलमाह—**स यो लोके** । **अक्षिति** चिरकालावस्थायित्वम् । ततश्च मधुविद्याया वस्वादिपदप्राप्तिपूर्वकब्रह्मप्राप्तिवत् अस्या अपि विद्यायाश्चिरायुष्पूर्वक चिरकालस्वर्गप्राप्तिपूर्वकब्रह्मप्राप्ति फलमित्युक्त भवति ॥ १७ ॥

उपास्यमानस्य प्राणस्य प्राणान्तरापेक्षया श्रैष्ठ्य वक्तु पूर्वपक्षमाह **तद्धैके गच्छन्तीति** । मुख्यप्राणश्चेतराणि चेन्द्रियाणि एकैकस्मिन्

त्युक्तम् । वाक्यभेद इति । 'मामेव विजानीहि' इत्यत्र चिद्विशिष्टो पासनविधि इह प्राणविशिष्टोपासनविधिरिति उपासनाना पृथक्पृथग्विधिनत्यर्थ ॥ १५ ॥

युगपत् सर्वेन्द्रियकार्यादर्शनात् पृथक्पृथगिन्द्रियाणा स्वस्व कार्ये असामर्थ्यावधारणात् एकेनेन्द्रियेण कार्ये क्रियमाणे अन्येन्द्रियाणि तत्र सहकारीणि भवन्ति, न पृथक् कार्ये क्षमन्त इति सर्वस्य कार्यस्य सर्वाधीनत्वात् प्राणानां समबलत्वमेवेति केषाञ्चित् पक्ष

न हि कश्चन शक्नुयात् सकृद्वाचा नाम प्रज्ञापयितुम्, चक्षुषा रूपम्, श्रोत्रेण [श्रोतु] शब्दम्, मनसा ध्यात(तु)मिति ॥ १९ ॥

कार्ये कर्तव्ये परस्परसाह्यलक्षणमेकभावं यान्ति । अतो मुख्यप्राणस्य प्राणान्तरसाम्यमेवेति केचिदाहुरित्यर्थः ॥ १८ ॥

तत्रोपपत्तिरुच्यते न हि... ध्यातुमिति । न हीन्द्रियजातं युगपदेव स्वकार्यं जनयितुमीष्ट इत्यर्थः ॥ १९ ॥

स्वयमिन्द्र उपवर्ण्य, एवमु हैतदिति तदिन्द्र ऊरीकृत्यैवोपरि मुख्यप्राणस्य प्राबल्यं प्रकारान्तरेणाचष्ट। सोऽयमूरीकारः किमेकेन्द्रियकार्यकाले इन्द्रियान्तरकार्याभावमात्रे, उत तत्तदिन्द्रियस्य स्वकार्ये अन्येन्द्रियसहकारित्वेऽपीति विमृश्यमेतत्। व्यर्थं तावत् चक्षुरादिकं प्रति श्रोत्रादीनां सहकारित्वकल्पनम्। मनसः सर्वेन्द्रियसहकारित्वात्, चक्षुःकार्यकाले मनः तस्यैव सहकारि भवतीति मनोरूपसहकारिविरहादेव श्रोत्रादिकं स्वकार्ये असमर्थमिति सर्वदर्शनसरण्यैवोपपत्तेः। वक्ष्यति चेहापि, 'प्रज्ञया वाचं समारुह्य,' 'न हि प्रज्ञापेता वाङ् नाम किञ्चन प्रज्ञापयेत्' इत्येवं मनसः सहकारित्वम्। किञ्च मुख्यप्राणस्य कार्ये इन्द्रियरूपप्राणानां सहकारित्वमसंभवि; तत्कार्योच्छ्वासनिश्वासादिना सह युगपदेव चक्षुरादिकार्यदर्शनेन तत्कार्ये एतदुपेक्षयाभावात्। एवं चक्षुराद्यभावे प्राणव्यापारसद्भावस्य वक्ष्यमाणत्वात् मुख्यप्राणव्यापारः प्राणान्तरनिरपेक्ष एव। एवं बधिरादेरपि दर्शनादिकार्यदर्शनेः श्रोत्रादेः चक्षुरादिसहकारित्वं दुर्वचमेव। अतः, 'चक्षुः पश्यत् सर्वे प्राणा अनुपश्यन्ति' इत्यादिवाक्यस्य नेन्द्रियान्तरसहकारित्वे तात्पर्यम्। किंतु एककार्यकाले अन्येषामव्यापृतत्वमात्रे। सर्वथा मुख्यप्राणस्येतरसाम्यमितो न सिद्ध्यति चेति। अत एव पूर्वपक्षमाहेत्यवतारिकाया भाषितम्। अतो नैव केषाञ्चिद् वास्तवः पक्ष इति ॥ १८ ॥

एकभूय वै प्राणा [भूत्वा] एकैक सर्वाण्ये[वै]तानि प्रज्ञापयन्ति ॥ वाच वदन्तीं (तीं) सर्वे प्राणा अनुवदन्ति ॥ २१ ॥

चक्षु पश्यत् सर्वे प्राणा अनुपश्यन्ति । श्रोत्र शृण्वत् सर्वे प्राणा अनुशृण्वन्ति । मनो ध्यायत् सर्व प्राणा अनुध्यायन्ति । प्राण प्राणन्तं सर्वे प्राणा अनुप्राणन्तीति । एवमुहै [वै] तदिति हेन्द्र उवाच ॥ २२ ॥

अस्ति त्वेव प्राणाना निःश्रेयसम् ॥ २३ ॥

जीवति वागपेत मूकान् हि पश्याम ॥ २४ ॥

जीवति चक्षुरपेत , अन्धान् हि पश्याम । जीवति श्रोत्रापेत , बधिरान् हि पश्याम । जीवति बाहुच्छिन्न , जीवति उरुच्छिन्न इति ; एव हि पश्याम ॥ २५ ॥

फलितमाह एकभूय प्रज्ञापयन्ति । तस्मात् सर्वे प्राणा एकत्व प्राप्य एकैक [भूत्वा ?] सर्वाण्येतानि नामरूपशब्दादीनि प्रज्ञापयन्ति ॥

तदेव प्रपञ्चयति वाच अनुवदन्ति । सहायतया तिष्ठन्तीत्यर्थ । एवमुत्तरत्रापि ॥ २१-२२ ॥

अथापि मुख्यप्राणस्य विशेष दर्शयति अस्ति त्वेव । प्राणाना मध्ये मुख्यप्राणस्य श्रैष्ठ्यमस्तीत्यर्थ ॥ २३ ॥

तदेव प्रपञ्चयति जीवति । वागिन्द्रियराहित्येऽपि शरीर धारणमस्ति , मूकाना दर्शनात् । एवमुत्तरत्रापि द्रष्टव्यम् ॥ २४ ॥

जीवति बाहुच्छिन्नो जीवत्युरुच्छिन्न इति । एव हि पश्याम ।

एतद्विद्यान्ते, 'स म आत्मेति विद्यात्' इति असमच्छब्दप्रयोगात् एतस्याऽपि विद्या इन्द्रोत्तिरूपैवेति स्पष्टम् । एवञ्च सति इह मध्ये इति हेन्द्र उवाचेति श्रुतिलेखनम्, मुख्यप्राणश्रैष्ठ्य वक्ष्यन् इन्द्रोऽपीद साम्यमापद्दर्शचकार हेत्याश्चर्यप्रकटनाय ॥ २२ ॥

अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति ॥ २६॥
तस्मादेतदेवोक्थ (त्थ) मुपासीत ॥ २७ ॥
यो वै प्राणः सा प्रज्ञा । या वै प्रज्ञा, स प्राणः । सह ह्येतावस्मिन्

छिन्नोरस्को जीवति, छिन्नबाहुर्जीवतीति । एवं ह्यनुभूयते ॥ २५ ॥

अथ खलु उत्थापयति । अथखलुशब्दः प्रसिद्धौ । मुख्यप्राण एव प्रज्ञात्मा । प्रज्ञाशब्दोऽत्र जीवपरः । स आत्मा सहायो यस्य स प्रज्ञात्मा । जीवसहायको मुख्यप्राण एव मृतप्रायं शयानं शरीरं परितो गृहीत्वा उत्थापयति ॥ २६ ॥

तस्मात् उपासीत । तस्मादितरेन्द्रियाणि परित्यज्य मुख्यप्राणमेवोत्थापयितृत्वगुणविशिष्टमुपासीत ॥ २७ ॥

यो वै सहोत्क्रामतः । अत्रापि प्रज्ञाशब्देन जीव उच्यते । जीवप्राणावस्मिन् शरीरे सह वसन्तौ, सहोत्क्रामतः । रतो

अथ खल्वित्यादि । एवं वागाद्यभावकालेऽपि शरीरस्य सम्यक् व्यापृतत्वदर्शनात् प्राणापेतत्वप्रसक्तिकाले शरीरपातस्यैव दर्शनाच्च प्राण एव शरीरं परिगृह्योत्थापयति । तदिदं श्रुत्यन्तरेष्वपि प्रसिद्धं वागादिभिरभ्युपेतञ्चेति खलुशब्देन सूच्यते । नन्विन्द्रियान्तराभावकाल इव प्राणाभावकाले जीवसत्तामात्रेण शरीरस्य व्यापृतत्वसम्भवात् प्राणोऽपि न प्रधानमिति शङ्कानुन्मेषाय प्राणजीवयोः पृथग्भावाभावं वक्तुं प्राणस्य प्रज्ञात्माभेदारोपणम् ॥ २६ ॥

एतद्विवरणमेव यो वै प्राण इत्यादिना । यादृशः प्राणः, तादृशो जीव इति परमार्थः । तद् विभ्रियते सह ह्येताविति । जीवस्य वासवत्त्वे प्राणोऽपि वासवान् । एकस्योत्क्रमवत्त्वेऽन्योऽप्युत्क्रमवान् । अतः प्राणमात्राभावकालो दुर्वच इति भावः । न केवलमेतत्, प्राण-

शरीरे वसत , सहोत्क्रामत· ॥ २८ ॥

तस्यैषैव दृष्टि एतद्विजानाति (एतद्विज्ञानम्) ॥ २९ ॥

हेतो जीव एव प्राण , प्राण एव जीव , उभावप्येककार्यकरा वित्यर्थ । अत परमात्मन प्राणशरीरकत्वेन जीवशरीरकत्वेन चानुसन्धान युक्तमिति भाव ॥ २८ ॥

तस्यैषैव विजानाति । तस्य मुख्यप्राणस्य ज्ञातृरूप आत्मा दृष्टिः दर्शनसाधनम् । जडस्य प्राणस्य ज्ञातृरूपजीवसाहित्यात् एवोत्थापनादिकार्यकरत्वादिति भाव ॥ २९ ॥

जीवयोरुभयोरपि सविषयेन्द्रियैकीभावास्पदत्वस्याविशिष्टत्वादपि साम्यमिति ॥ २८ ॥

एव प्रधानजीवाभिन्नतया निरीक्ष्ये प्राणे कथ नोत्कर्ष इति व्युत्पादयितुम् तस्यैषैव दृष्टिरित्याद्यारम्भ । एतद्विजानातीत्यस्य, यदेतत् जीवतत्त्व विज्ञानकर्तृ एतदेव तस्य दृष्टि. दर्शनसाधकमित्यर्थोऽभिमत । अत्र वागाद्यप्ययकालेऽपि प्राणस्यानप्ययेन स्थितिविषये इद वक्ष्यमाणमेक निदर्शनमिति तस्यैषैव दृष्टिरिति वाक्येनोच्यते । तदेव पुनर्विव्रियते एतद् विज्ञानमिति । विजानातीत्येतस्याने विज्ञानमिति पाठस्यैव सम्प्रति दर्शनात् । निदर्शनमित्यर्थे प्रज्ञानमिति पदप्रयोगस्य न्यायभाष्यादौ दृष्टत्वात् दृष्टिरित्यस्य विज्ञानमिति पर्यायान्तरेण विवरणम् । प्राणस्यानप्ययेन स्थितिविषये मूर्छारूपनिदर्शनान्तर वक्तु पुन , तस्यैषैव सिद्धिरेतद्विज्ञानमिति वाक्यारम्भ । तदुपरि तस्यैषैव दृष्टिरिति वाक्य तु कोशान्तरेषु नोपलभ्यते । भाष्येऽपि तत्पाठस्थितौ न किञ्चिद् गमकम् । पूर्णमूलखण्डग्रहणपूर्व प्रकाशिकाया क्रियमाणायाम्, तादृशात् तालकोशात मूलभाग पृथक्कृत्य व्याख्याभागमात्र प्रतीकेनापि रहित

यत्रैतत्पुरुषः सुप्तः स्वप्नं न कथञ्चन पश्यति, अथास्मिन् प्राण एवैकधा भवति ॥ ३० ॥

तदैनं वाक् सर्वैर्नामभिः सहाप्येति ॥ ३१ ॥ चक्षुः सर्वै रूपैः

यत्र....भवति । यत्र यदा एतत्पुरुषः एष पुरुषः सुप्तस्सन् न कश्चन स्वप्नं पश्यति, अथ-तदेत्यर्थ.—अस्मिन् प्राणे प्राणशरीरके परमात्मनि अयं सुप्तः पुरुषः एकधा भवति । एकधाभावप्रकारश्चोत्तराध्याये वक्ष्यते ॥ ३० ॥

तदैनं... सहाप्येति । परमात्मनैकीभूते जीवे स्वकार्येण

पृथङ्निवेद्य मुद्रयद्भिः तस्यैवैव दृष्टिरित्यंशस्य मूलत्वकल्पनेन अयथायथं मुद्रणं कृतम् । भाष्ये तु तस्यैवैव सिद्धिरेतद्विज्ञानमिति मूलवाक्यं व्याख्याय तदिदं पूर्वोक्तस्य तस्यैवैव दृष्टिरेतद्विजानातीति वाक्यस्य पुनर्वचनपरमिति बोधयितुं प्रवृत्तमिति । सुषुप्तौ मुख्यप्राणमात्रस्योच्छ्वासनिश्वासरूपेणावस्थितेः प्रत्यक्षत्वात् मूर्च्छायामपि सूक्ष्मरूपेण तत्स्थितेरौष्ण्यादिना गृह्यमाणत्वात् उभयोर्निदर्शनत्वम् । सुषुप्ताविव मूर्च्छायां प्राणस्य विस्पष्टदर्शनाभावादाक्षेपतः सिद्धिमभिप्रेत्य दृष्टिरित्यनुक्त्वा सिद्धिरित्युक्तिः। एतद्रीत्या उत्क्रान्तिकाले मुख्यप्राणे इतरप्राणाप्ययस्य शास्त्रैकवेद्यत्वात् तत्र (४१) तस्यैवैव दृष्टिरित्याद्युक्तिः । एवमर्थवर्णनसंभवेऽपि विजानातीति पाठमवलम्ब्य भाष्येऽन्यथार्थवर्णनमिति ध्येयम् । एतद्विजानातीति पाठेऽपि, 'तस्यैषा दृष्टिः यत्रैतदस्मिन् शरीरे संस्पर्शेनोष्णिमानं विजानाति' इति(३.१३)छान्दोग्यवाक्य इवोक्तरीत्याऽर्थवर्णनं युक्तम्, एतद्विजानातीत्यस्य अनन्तरवाक्यवक्ष्यमाणं विजानातीति यत्, एषैव तस्य दृष्टिरिति व्याख्यासंभवात् ।

वक्ष्यत इति । व्याख्यास्यत इत्यर्थः ॥ ३० ॥

सहाप्येति ॥ ३२ ॥ श्रोत्रं सर्वैः शब्दैः सहाप्येति । मनः सर्वैर्ध्यानैः सहाप्येति ॥ ३३ ॥

स यदा प्रतिबुध्यते—यथाऽग्नेः [ज्वलतो] विस्फुलिङ्गा विप्रतिष्ठेरन्, एवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते ; प्राणेभ्यो देवाः, देवेभ्यो लोकाः ॥ ३४ ॥

तस्यैषैव सिद्धिः ॥ ३५ ॥ एतद्विज्ञानम् ॥ ३६ ॥
[तस्यैषैव दृष्टिः ॥] (१)

नामाभिलपनेन सह वागिन्द्रियं लीनं भवतीत्यर्थ ॥ ३१ ॥

चक्षुः...अप्येति । अत्र रूपशब्दो रूपज्ञानौपयिकव्यापारपर । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ३२ ॥ श्रोत्रं अप्येति ॥ ध्यानैः ध्यानौपयिकव्यापारैरित्यर्थ । शिष्टं स्पष्टम् ॥ ३३ ॥ स यदा.... लोका. । प्राणाः जीवा , देवाः इन्द्रियाणि , लोकाः ज्ञानानि ॥

तस्यैषैव सिद्धिः तस्य एवम्भूतस्य मुख्यप्राणस्य सिद्धिः कार्यसाधकम् एतद्विज्ञानम् एतस्य जीवस्य यत् विज्ञानम्, तदेव साधकम् । अथवा विज्ञानलक्षणमेतदात्मतत्र (त्मतत्त्वं ?) साधकमित्यर्थ. । प्राणजीवौ एकतामापन्नौ एककार्यसाधकाविति यावत् । ''तस्यैषैव दृष्टिः एतद्विजानाति'' इत्युक्त एवार्थोऽनेनापि वाक्येन दार्ढ्यायोक्त ॥३६

प्राणाः जीवा इति । 'देवाः श्रद्धां जुह्वति' इत्यादौ देवशब्दस्येन्द्रियेषु प्रयोगप्रसिद्धेः, अपौनरुक्त्याय प्राणा इति इन्द्रियग्रहणायोगात्, अग्निविस्फुलिङ्गसादृश्यस्य परमात्मजीवात्मनोः आत्मनः प्राणा इत्यनेनोक्तौ सामञ्जस्यात्, भूमविद्यायाम्, 'आत्मतः प्राण आत्मत आशा' इति प्राणपदेन जीवग्रहणदर्शनाच्चैवमर्थो वर्णितः ।

यत्रैतत्पुरुष आर्तो मरिष्यन् आबल्यं न्येति (त्य) मोहं न्येति, तदाहुः उदक्रमीच्चित्तम्। न शृणोति ; न पश्यति, न वाचो वदति— अथास्मिन् प्राण एवैकधा भवति ॥ ३७ ॥

तदेनं वाक् सर्वैर्नामभिः सहाप्येति ॥ ३८ ॥

चक्षुः सर्वैः रूपैः सहाप्येति, श्रोत्रं सर्वैः शब्दैः सहाप्येति, मनः सर्वैर्ध्यानैः सहाप्येति। स यदा प्रतिबुध्यते ॥ ३९ ॥

यथाऽग्नेः [ज्वलतो] विस्फुलिङ्गा विप्रतिष्ठेरन्, एवमेवैतस्मादात्मनः प्राणाः यथायतनं विप्रतिष्ठन्ते, प्राणेभ्यो देवाः, देवेभ्यो लोकाः॥

सुप्तौ मुख्यप्राणस्येतरप्राणाप्ययोद्गमनापादानहेतुत्वमुक्त्वा मूर्च्छायामपि तदाह *यत्रैतत्...एकधा भवति*। यदा एष पुरुषः व्याध्यादिना पीडितो मरिष्यन् आबल्यम्–अबलस्य भावं आबल्यम् बलराहित्यं न्येति नितरामेति गच्छति मोहं मूर्च्छां न्येति प्राप्नोति, तदा समीपवर्तिन आहुः, चित्तमुदक्रमीत् इति। मनः निलीनमित्यर्थः। तत्र हेतुः न शृणोति न पश्यति न वाचा वदतीति। अथ तदा *अस्मिन् प्राणे प्राणशरीरके परमात्मनि ऐकध्यं प्रयातीत्यर्थः* ॥३७-३८

स यदा प्रतिबुध्यते। आयुश्शेषोपौषधवशादित्यर्थः ॥ ३९ ॥

उत्क्रान्तावपि मुख्यप्राणस्य सर्वोपजीव्यतामाह *यथाग्नेः...लोकाः*॥

अन्यथा तु प्राणपदेनेन्द्रियग्रहणम्, देवपदेन तदधिष्ठातृदेवताग्रहणं तत्कार्यग्रहणं वा, लोकपदेन इन्द्रियकार्यग्रहणं विषयग्रहणं वेति वक्तव्यम्। विमृष्टमिदं श्रुतप्रकाशिकायाम्। एकपुरुषप्रतिबोधवर्णनार्थे वाक्ये बहुजीवविप्रतिष्ठानवर्णनं न रुचिरमिति चेत्–अस्तु कोऽप्यर्थः। किमनेन मुख्यप्रमेयबाधनप्रसङ्गरहितेन ॥ ३५ ॥

इत्युक्त एवार्थ इति। इति पूर्ववाक्याभ्यामुक्त एवार्थः

स यदाऽस्माच्छरीरादुत्क्रामति—

वागस्मात् सर्वाणि नामान्यभिविसृजते ॥४१॥ वाचा सर्वाणि नामान्याप्नोति ॥ ४२ ॥ [स प्राणो वाचा सर्वाणि नामान्याप्नोति] (?)

घ्राणोऽस्मात् सर्वान् गन्धानभिविसृजते । घ्राणेन सर्वान् गन्धानाप्नोति ॥ ४३ ॥

चक्षुरस्मात् सर्वाणि रूपाण्यभिविसृजते । चक्षुषा सर्वाणि रूपाण्याप्नोति । श्रोत्रमस्मात् सर्वान् शब्दानभिविसृजते । श्रोत्रेण सर्वान् शब्दानाप्नोति । मनोऽस्मात् सर्वाणि ध्याना (ता) न्यभिविसृजते । मनसा सर्वाणि ध्याना (ता) न्याप्नोति ।

सैषा प्राणेन सर्वाप्तिः ॥ ४४ ॥

स यदा अभिविसृजते । स प्राण· यदाऽस्माच्छरीरात् उत्क्रामति, तदा वागिन्द्रियमेतच्छरीरप्रयुक्तनामाद्यभिलपनं त्यजति ॥

वाचा सर्वाणि नामान्याप्नोति । यत्र प्राण स्वयं तिष्ठति, तत्रैव शरीरे स्वोपकरणभूतवागिन्द्रियेण सर्वनामाभिलपनरूपं व्यवहारं करोति । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ४२ ॥

घ्राणोऽस्मात् । घ्राणेन सर्वान् गन्धानाप्नोति । घ्राणजन्यज्ञानेन सर्वान् गन्धान् विषयीकरोतीत्यर्थः ॥ ४३ ॥

चक्षुः आप्नोति । सैषा प्राणेन सर्वाप्तिः । सर्वेषां विषयाणा

इत्यर्थः । एकोनत्रिंशवाक्ये सर्वं द्रष्टव्यम् ॥ ३६ ॥

वागस्मादिति । पूर्वम् अस्माच्छरीरादिति शरीरस्यैव अस्मादित्युक्त्या इदमप्यस्मात्पदं तत्परमित्यभिसंधाय एतच्छरीरप्रयुक्तेत्युक्तम् । अन्यथा प्राणोऽपि तदर्थः स्यात् । अभिविसृजते अभितस्त्यजति ; न स्वव्यापारे क्षमत इत्यर्थः ॥ ४१ ॥

एवं मुख्यप्राणे सत्येव सर्वेषां कार्यक्षमत्वात् मुख्यप्राणेनैव सर्वमाप्यत इति प्राणप्राधान्यस्योपसंहारः सैषा प्राणेन सर्वाप्तिरिति ॥

यो वै प्राणः सा प्रज्ञा । या वै प्रज्ञा स प्राणः । सह ह्येतावस्मिन् शरीरे वसतः, सहोत्क्रामतः ॥ ४५ ॥

अथ खलु यथा प्रज्ञायां सर्वाणि भूतान्येकीभवन्ति, तद् व्याख्यास्यामः —

वागेवास्या एकमङ्गमुदूढम्, तस्यै (स्यै) नाम पुरस्तात्(?) प्रतिविहिता भूतमात्रा ॥ ४६ ॥

प्राणाधीनेन्द्रियजन्यज्ञानविषयत्वलक्षणा प्राणकर्तृकसर्वाप्तिरित्यर्थः ॥४४

यो वै ... उत्क्रामतः । उक्तोऽर्थः ॥ ४५ ॥

प्राणस्य सर्वभूताश्रयत्वमुक्त्वा प्रज्ञाशब्दितस्य जीवस्य सर्वभूताश्रयत्वप्रकारं कथयत इत्याह अथ खलु ... व्याख्यास्यामः ।

वागेव...उदूढम् । अस्याः प्रज्ञाया वागिन्द्रियमेकमङ्गम् उदूढं परिगृहीतमित्यर्थः । उद्वाहकर्मभूतपत्नीवत् परिगृहीतमित्यर्थः ; वस्तुतस्त्वाङ्गाभावात् । तस्यै नाम...भूतमात्रा । तस्याः वाचः पुरस्तात् ग्राह्यत्वेन विषयत्वेन प्रतिविहिता प्रतिद्वन्द्वितया प्रतिनियततया

प्राण एव प्रज्ञात्मेति प्राणजीवाभेदनिर्देशस्य सादृश्यनिबन्धनत्वं दर्शयता प्राणस्य सर्वशरीरावस्थानत्वमेतावतोपपाद्य प्रज्ञाशब्दवाच्ये जीवेऽपि तदुपपादयितुं यो वै प्राण इति पूर्ववाक्यपुनःपाठः । अथोपपादनम् अथ खल्वित्यादिना ।

उदूढमिति । प्रज्ञाया उदूढानि यानि, तत्र वागेकमङ्गमित्यर्थः । परस्तादिति सर्वसम्मतः पाठः, न तु पुरस्तादिति । ग्राह्यग्राहकयोरैक्यभ्रान्त्यपोहनाय परस्तादित्युक्तिः । तद्विवरणं प्रतिद्वन्द्वितयेत्यन्तम् । उदूढमित्येतत्स्थाने अदूदुहदित्येव श्रुतप्रकाशिकापाठोऽपि । अदूदुहत् अपूरयदिति अद्वैतिव्याख्या शाङ्करसूत्रभाष्ये । वाक् प्रज्ञाया पराङ्गभूतमिति परमार्थः । एवमग्रेऽपि ॥ ४६ ॥

घ्राणमेवास्या एकमङ्गमुदूढम्, तस्य गन्धः पुरस्तात् प्रतिविहिता भूतमात्रा । चक्षुरेवास्या एकमङ्गमुदूढम्, तस्य रूपं पुरस्तात् प्रतिविहिता भूतमात्रा। श्रोत्रमेवास्या एकमङ्गमुदूढम्, तस्य शब्दः पुरस्तात् प्रतिविहिता भूतमात्रा । जिह्वैवास्या एकमङ्गमुदूढम्, तस्यान्नरसः पुरस्तात् प्रतिविहिता भूतमात्रा । हस्तावेवास्या एकमङ्गमुदूढम्, तयोः कर्माणि (र्म) पुरस्तात् प्रतिविहिता भूतमात्रा । शरीरमेवास्या एकमङ्गमुदूढम्, तस्य सुखदुःखे पुरस्तात् प्रतिविहिता भूतमात्रा । उपस्थ एवास्या एकमङ्गमुदूढम्, तस्यानन्दो रतिः प्रजातिः पुरस्तात् प्रतिविहिता भूतमात्रा ॥ ४७ ॥

पादावेवास्या एकमङ्गमुदूढम्, तयोरित्याः (त्या) पुरस्तात् प्रतिविहिता भूतमात्रा ॥ ४८ ॥

प्रज्ञैवास्या एकमङ्गमुदूढम्, तस्यै धियो विज्ञातव्यं कामाः पुरस्तात् प्रतिविहिता भूतमात्रा ॥ ४९ ॥

प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति ॥ ५० ॥

विहिता भूतमात्रा नाम । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ४६ ॥

प्रजातिः प्रजननमित्यर्थः ॥ ४७ ॥ **इत्याः** गमनानीत्यर्थः ॥

प्रज्ञैवास्याः...भूतमात्रा । अथ(अत्र?)प्रथमान्त प्रज्ञाशब्दः मनःपरः ; अस्या इति तु प्रज्ञारूपजीवपरः । उत्तरत्र, 'नैत्या विजिज्ञासीत नेतारं विद्यात्' इत्यनन्तरम्, 'न मनो विजिज्ञासीत' इति मनःशब्दप्रयोगात् स्थानप्रमाणेन प्रज्ञाशब्दस्य मन एवार्थः । **धियो विज्ञातव्यम्** मनोजन्यज्ञानविषयमि(य इ?)त्यर्थः । **कामाः** काम्यमाना इत्यर्थः ॥ ४९

एवं नामगन्धरूपशब्दरसकर्मसुखदुःखानन्दगतिज्ञातव्याः दश भूतमात्राः वाग्घ्राणादिविषयत्वेनोक्त्वा प्रज्ञाशब्दितस्य जीवस्य नामादिदशविधभूतमात्राप्तिप्रकारमाह **प्रज्ञया वाचं...** । अत्र प्रज्ञाशब्दः

प्रज्ञया घ्राण (प्राण) समारुह्य घ्राणेन (प्राणेन) सर्वान् गन्धानाप्नोति ॥ ५१ ॥

प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति ॥ ५२॥

प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वान् शब्दानाप्नोति । प्रज्ञया जिह्वां समारुह्य सर्वानन्नरसानाप्नोति । प्रज्ञया हस्तौ समारुह्य हस्ताभ्यां सर्वाणि कर्माण्याप्नोति । प्रज्ञया शरीरं समारुह्य उपस्थेनाऽऽनन्दं रतिं प्रजातिमाप्नोति। प्रज्ञया पादौ समारुह्य पादाभ्यां सर्वा इत्या आप्नोति । प्रज्ञयैव धियं समारुह्य प्रज्ञयैव धियो विज्ञातव्यं कामानाप्नोति ॥ ५३ ॥

अव्यवहितप्रज्ञाशब्दनिर्दिष्टमन पर । ततश्च मनसा वागिन्द्रियमधिष्ठाय तद्द्वारा सर्वाणि नामानि अभिलपनक्रियाद्वारा प्राप्नोति ॥ ५० ॥

प्रज्ञया घ्राण...आप्नोति । मनसा घ्राणेन्द्रियमधिष्ठाय तद्द्वारा सर्वान् गन्धान् आप्नोति-ज्ञानेन व्याप्नोति । एवमुत्तरत्रापि द्रष्टव्यम् , मनसा चक्षुरिन्द्रियमधिष्ठाय तद्द्वारा सर्वाणि रूपाण्याप्नोति ज्ञानेन व्याप्नोतीति ॥ ५१—५३ ॥

प्रज्ञया वाचमित्यादिवाक्येषु तृतीयान्तं पूर्ववाक्यप्रज्ञामन - परम् । जीवस्तु आप्नोति कर्ता, न करणम् ॥ ५१ ॥

प्रज्ञयैव धियं समारुह्येत्यत्र धियमिति धर्मभूतज्ञानपरम्। मानसकार्याणां सर्वेषां धर्मभूतज्ञानपरिणामत्वात् तदपेक्षाधीव्यात् । प्रज्ञयैव इत्ययमेवकार पूर्वस्थलेषु समारोहसाधनस्य विषयप्रापकस्य करणस्य च प्रज्ञावागादिरूपेण भेदवत् इह भेदो नास्ति; मन एव समारोहि विषयप्रापकश्चेति प्रज्ञर्थे । अस्तु वा धियमिति मन - परमेव प्राक् तयोर्थे ॥ ५३ ॥

न हि प्रज्ञापेता वाक् नाम किञ्चन प्रज्ञापयेत् ॥ ५४ ॥

अन्यत्र मे मनोऽभूदित्याह, नाहमेतन्नाम प्राज्ञासिषमिति ॥

न हि प्रज्ञापेतो घ्राणो गन्धं कञ्चन प्रज्ञापयेत् । अन्यत्र मे मनोऽभूदित्याह, नाहमेतं गन्धं प्राज्ञासिषमिति । न हि प्रज्ञापेतं चक्षू रूपं किञ्चन प्रज्ञापयेत् । अन्यत्र मे मनोऽभूदित्याह, नाहमेतद्रूपं प्राज्ञासिषमिति । न हि प्रज्ञापेतं श्रोत्रं शब्दं कञ्चन प्रज्ञापयेत् । अन्यत्र मे मनोऽभूदित्याह, नाहमेतं शब्दं प्राज्ञासिषमिति । न हि प्रज्ञापेता जिह्वा अन्नरसं कञ्चन प्रज्ञापयेत् । अन्यत्र मे मनोऽभूदित्याह, नाहमेतमन्नरसं प्राज्ञासिषमिति ॥ ५५ ॥ न हि प्रज्ञापेतौ हस्तौ कर्म किञ्चनप्रज्ञापयेताम् । अन्यत्र मे मनोऽभूदित्याह, नाऽहमेतत् कर्म प्राज्ञासिषमिति । न हि प्रज्ञापेतं शरीरं सुखदुःखे किञ्चन प्रज्ञापयेत् । अन्यत्र मे मनोऽभूदित्याह, नाहमेतत् सुखदु खे प्राज्ञासिषमिति । न हि प्रज्ञापेत उपस्थः आनन्दं रतिं प्रजातिं कञ्चन प्रज्ञापयेत् । अन्यत्र

ननु मनोद्वारा नियमनं किमर्थमित्याशङ्क्याह न हि...प्रज्ञापयेत् । न हि मनोनधिष्ठितं वागिन्द्रियं नामप्रज्ञापनसमर्थं भवतीत्यर्थ. ॥ ५४ ॥

अत्र लोकमेव साक्षित्वेनोदाहरति अन्यत्र मे...। लोको हि अन्यत्र मे मनोऽभूदित्युक्त्वा, 'एतन्नाम न प्राज्ञासिषम्' इति ब्राह (इत्याह?) । मनोव्यासङ्गवशात् ज्ञानपूर्वकनामाभिलपनलक्षणवागिन्द्रियव्यापारो नामूदिति हि लोकः प्रत्येतीत्यर्थ । एवमुत्तरत्रापि द्रष्टव्यम् ॥५५-५६॥

सर्वकरणानां मनोपेक्षां व्यतिरेकमुखेनोपपादयति न हि प्रज्ञापेतेति ॥ प्रज्ञापयेदिति । ज्ञानेन्द्रियाणां प्रज्ञापकत्वं स्वरसम् । कर्मेन्द्रियाणां तु ज्ञानपूर्वकस्य परज्ञानहेतुभूतस्य च व्यवहारस्य हेतुत्वात् प्रज्ञापकत्ववाचोयुक्तिः ॥ ५४-५६ ॥

मे मनोऽभूदित्याह, नाहमेतमानन्द रति प्रजाति प्राज्ञासिषमिति । न हि प्रज्ञापेतौ पादावित्या काञ्चन प्रज्ञापयेताम् । अन्यत्र मे मनोऽभूदित्याह, नाहमेतामित्या प्राज्ञासिषमिति । न हि प्रज्ञापेता धी. काचन सिद्ध्येत् ॥ ५६ ॥ न प्रज्ञातव्य प्रज्ञायेत ॥ ५७ ॥
न वाच विजिज्ञासीत, वक्तार विद्यात् ॥ ५८ ॥

एव प्रज्ञाशब्दितस्य जीवस्य भूतमात्राव्याप्तिप्रकारकथनमुखेन आत्मानात्मविवेक प्रदर्श्य, 'अन्या वाचो विमुञ्चथ' इत्युक्तरीत्या **भूतमात्रा**शब्दितानात्मविज्ञान परिहर्तव्यमित्याह **न प्रज्ञातव्य प्रज्ञायेतेति** । ज्ञात्रात्मव्यतिरिक्त अनात्मभूतो विषयो न ज्ञातव्य इत्यर्थ ॥

तदेव प्रपञ्चयति **न वाच विद्यात्** । अत्र वाक्छब्द प्रकरणानुगुण्यात् नामपर । **वक्तारम्** उक्तरीत्या मनोधिष्ठितवागिन्द्रियजन्याभिलपनक्रियया नामव्याप्तारमात्मानमेव विद्यात् । वक्तृजीवशरीरक परमात्मान विद्यादिति यावत् । एवमुत्तरत्रापि द्रष्टव्यम् ॥ ५८ ॥

न प्रज्ञातव्य प्रज्ञायेतेति । पूर्व, तस्यै धियो निज्ञातव्यमिति द्वयोः प्रसक्तत्वात् तत्र प्रज्ञाविरहे धियो न भवन्तीतिवत् प्रज्ञातव्यमपि न प्रज्ञायेतेत्युच्यत इति युक्त व्याख्यातुम् । अथापि तदा, 'प्रज्ञाविरहे' इत्यध्याहारादिगौरवात् वक्ष्यमाणार्थस्य समुदायतो निर्देश प्रथममिति योजना वक्ष्यन् अवतारयति एव प्रज्ञाशब्दितेनेति । तथा च न प्रज्ञायेतेत्येतत् निषेधविधिरूपम्, प्रज्ञातव्य = विषयो न प्रज्ञातव्य इति भाव । वस्तुत पूर्ववाक्येऽपि धिय इति विज्ञातव्यमित्येतद्विशेषणमेव । तस्यै इति धीविशेषणम् । तथा चतुर्थीप्रयोग श्रुतिशैली ॥५७

वक्तृजीवशरीरकेति । यद्यपि वाक्यानीमानि जीवमात्रपराणि ; उपरि तथा ख्यास्येति परमात्मपरमिति सुवचम् = अथाप्यस्य कैवल्यस्यानादेयत्वात् विशिष्टविवक्षा ।

न गन्धं विजिज्ञासीत, घ्रातारं विद्यात्। न रूपं विजिज्ञासीत, रूपं विद्वांसं (रूपविदं) विद्यात् ॥ ५९ ॥ न शब्दं विजिज्ञासीत, श्रोतारं विद्यात्। नान्नरसं विजिज्ञासीत, अन्नरसविज्ञातारं विद्यात्। न कर्म विजिज्ञासीत, कर्तारं विद्यात्। न सुखदुःखे विजिज्ञासीत, सुखदुःखयोर्विज्ञातारं विद्यात्। नानन्दं न रतिं न प्रजातिं विजिज्ञासीत; आनन्दस्य रतेः प्रजातेर्विज्ञातारं विद्यात्। नेत्यां विजिज्ञासीत, एतारं विद्यात्। न मनो विजिज्ञासीत, मन्तारं विद्यात्। ता वा एता दशैव भूतमात्राः अधिप्रज्ञम्, दश प्रज्ञामात्रा अधिभूतम्। यद्धि(दि) भूतमात्राः न स्युः, प्रज्ञामात्राः न स्युः, यदि(द्वा) प्रज्ञामात्रा न स्युः, न भूतमात्राः स्युः। न ह्यन्यतरतो रूपं किञ्चन सिद्ध्येत्, नो एवैतन्नाना ॥६०

रूपं विद्वांसं रूपं पश्यन्तं विद्यादित्यर्थः ॥ ५९ ॥

ता वा एताः सिद्ध्येत्। नामगन्धरूपशब्दरसकर्मसुखदुःखानन्दरतिप्रजातीत्याज्ञातव्यलक्षणाः दश भूतमात्राश्च, तद्ग्राहिवाग्घ्राणचक्षुःश्रोत्रजिह्वाहस्तशरीरोपस्थपादमनोलक्षणाः दश प्रज्ञामात्राश्चान्योन्याधाराः। वागादीन्द्रियाणामभावे नामादिसिद्धेरभावेन वागादिलक्षणप्रज्ञामात्राधीनसिद्धिकत्वात् नामादिभूतमात्राणाम्, नामादिभूतमात्राणामभावे तद्व्यवहारफलकप्रज्ञामात्राशब्दितेन्द्रियाद्यनिष्पत्तेः। अतो ग्राह्यग्राहकोभयाधीनत्वात् सर्वलोकयात्राया **नो एवैतन्नाना।** नानाशब्दो विनार्थकः। एतत् ग्राह्यग्राहकजातं परस्परविनाभूतमित्यर्थः। न हि ग्राह्येण विनाकृतं ग्राहकं ग्राहकेण विनाकृतं ग्राह्यं कार्यक्षमं भवति। तस्मात् **प्रज्ञामात्रा**शब्दितमति भूतमात्रानन्यगमित्यर्थः ॥ ६० ॥

दश प्रज्ञामात्रा इति। अत्र एकादशेन्द्रियमध्ये त्वगिन्द्रियस्य तद्विषयभूतस्य स्पर्शस्य च मूले त्यक्तत्वात् दशेत्युक्तिः ॥ ६०

तद् यथा रथस्यारेषु नेमिरर्पिता, नाभावरा अर्पिताः, एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः, प्रज्ञामात्राः प्राणेऽर्पिताः ॥ ६१ ॥

तद् यथा रथस्य....प्राणेऽर्पिताः । यथा रथस्य नाभौ रथचक्रमध्यवर्तिसरन्ध्रकाष्ठविशेषे अरशब्दिता अर्पिताः ; अत्र नेमिशब्दितं वलयाकारं काष्ठं यथा अर्पितम्—एवं प्राणशब्दितपरमात्मनि प्रज्ञामात्राशब्दनिर्दिष्टाश्चेतना अर्पिताः । तेषु च भूतमात्राशब्दितग्राह्यग्राहकजातं सर्वं समर्पितमित्यर्थः ।

नन्वत्र प्रज्ञामात्राशब्देन, यद्धि भूतमात्रा न स्युः न प्रज्ञामात्राः स्युः, यदि प्रज्ञामात्रा न स्युः न भूतमात्राः स्युरिति पूर्ववाक्ये प्रज्ञामात्राशब्दनिर्दिष्टानां वागादीनां दशानामेव ग्रहणमुचितम् । न तु प्रज्ञात्मनाशया, 'यो वै प्राणः सा प्रज्ञा' इति व्यवहितकेवलप्रज्ञाशब्दनिर्दिष्टजीवपरत्वमिति चेन्न–पूर्ववाक्ये अन्योन्याधाराधेयभावप्रतिपादनदर्शनात् । तत्र प्रज्ञामात्राशब्दस्य वागादिपरत्वेऽपि इह प्रज्ञामात्राशब्दनिर्दिष्टस्य भूतमात्राधीनत्वाप्रतिपादनात् प्राणशब्दितपरमात्माधीनत्वस्यैव प्रतिपादनात् प्रज्ञामात्राशब्दो जीवपर एव । पूर्ववाक्ये बाधकसत्त्वात् प्रज्ञाशब्दस्य मुख्यार्थत्यागेऽपि इह मुख्यार्थत्यागे

प्रस्तोपासनोपास्याकाराणां मध्ये मुख्यप्राणस्य निरूपणं प्रथमं कृत्वा अथ जीवं तदन्तर्गतं प्राणप्रवर्तककौमारान्यदं निरूप्य तस्येतरपर्जनेनोपास्यत्वमुपपाद्य, तदुपासनमपि तद्विशिष्टपरमात्मोपासनरूपमेव कार्यमिति स्वाभिमतव्यक्तये संप्रति तदधिकं परमात्मानमपि सदृष्टान्तं निरूपयितुमारभते तद्यथेति । 'मात्राशब्दः संघातवचनः' इति श्रुतप्रकाशिका ॥ ६१

स एष प्राण एव प्रज्ञात्मा (प्राज्ञ आत्मा) आनन्दोऽजरोऽमृत ॥ ६२॥
स न साधुना कर्मणा भूयान् नो एवासाधुना कर्मणा कनीयान्। ६३
एष ह्येवैन साधु कर्म कारयति तम्, यमेभ्यो लोकेभ्य उन्निनीषति ॥

कारणाभावात्। यथाऽस्मिन् प्रकरणे, 'यावध्यस्मिन् शरीरे प्राणो वसति तावदायु', 'अथास्मिन् प्राण एवैकधा भवति', 'एतस्मादात्मन प्राणा यथायतन विप्रतिष्ठन्ते' इति त्रिष्वपि वाक्येषु मुख्यप्राणपरमात्म-जीवपरत्वेन भिन्नार्थकत्वम्, एव, 'प्रज्ञैवास्या एकमङ्गमुदूढम्' इत्यत्र (मुदूढम्',?) 'न हि प्रज्ञापेता वाङ् नाम किञ्चित् प्रज्ञापयेत्', 'दशैव भूत-मात्रा अधिप्रज्ञम्' इति वाक्येषु जीवमनइन्द्रियरूपार्थत्रयविषये दृष्ट प्रयोगस्य प्रज्ञाशब्दस्य अर्थौचित्यानुसारेणैवार्थस्य वर्णनीयत्वात्। न चैक वचनान्तप्रज्ञाशब्दनिर्दिष्टस्य बहुवचनान्तप्रज्ञामात्राशब्देन परामर्शो न युक्त इति वाच्यम्-सद्विद्यायाम्, 'स्वमपीतो भवति' इत्येकवचनान्तशब्द निर्दिष्टस्य जीवस्य, 'सति सपद्य न विदु' इति बहुवचनान्तशब्देन निर्देशव-दुपपत्ते। एतत् सर्व श्रुतप्रकाशिकायामिन्द्रप्राणाधिकरणे स्पष्टम् ॥

स एष प्राज्ञ आत्मा आनन्दोऽजरोऽमृतः। प्रज्ञ एव प्राज्ञ। निरुपाधिकसार्वज्ञ्याश्रय निरुपाधिकान दत्वाजरत्वाश्रय ॥ ६२ ॥
स न साधुना - कनीयान्। पुण्यपापकृतोत्कर्षापकर्षशून्य इत्यर्थ ॥
एष ह्येन उन्निनीषति। य पुरुषमेभ्यो लोकेभ्य ऊर्ध्व भगवल्लोक

स एष प्राण एव प्रज्ञात्मेति पाठ एव श्रीभाष्य-भाष्यान्तराधा दृत न तु स एष प्राज्ञ आत्मेति ॥ ६२

एष ह्येवैनमसाधु कर्म कारयति यमधो निनीषति ॥ ६५ ॥
एष लोकपाल एष लोकाधिपतिरेष सर्वेशः ॥ ६६ ॥

नेतुमिच्छति, तं पुरुषं भगवल्लोकप्राप्तये साधुकर्म कारयति । कर्मणां भगवल्लोकप्राप्त्युपयोगित्वञ्च तद्धेतुभूतविद्याविरोधिपापनिरसनद्वारा ॥६४

एष ह्येवैनमसाधु...अधोनिनीषति : यं पुरुषमेभ्यो लोकेभ्यः अध.पातयितुमिच्छति, तमसाधु कर्म कारयति । यथा साधुकर्मणां ब्रह्मोपासननिष्पादनद्वारा उन्नयनहेतुत्वम्, एवमसाधुकर्मणामप्युपासनप्रतिबन्धद्वारा अधोनयनहेतुत्वम् । उक्तञ्च **भगवता भाष्यकृता**, "पापस्य ज्ञानोदयविरोधित्वम्, 'एष एवासाधु कर्म कारयति तं यमधो निनीषति' इति श्रुत्याऽवगम्यते" इति । विवृतञ्च **व्यासार्यैः**, "कर्मणामुन्नयनहेतुत्वमुपासननिष्पादनरूपमिति तद्विपरीतमधोनयनमुपासनप्रतिबन्धरूपमिति स्फुटतरमवगम्यते" इति ॥ ६५ ॥

एष....सर्वेशः । **लोकपालः** लोकरक्षकः । अत्र **व्यासार्याः**, "**लोकाधिपतिः** लोकस्वामी । **सर्वेशः** सर्वनियन्ता । ननु 'पा रक्षणे' इति धातोः **पति**शब्दः । तत् कथमत्र शेषिवाचित्वम् ? उच्यते—न हि सर्वत्रावयवशक्तिरेव रूढिशक्तिरित्यस्ति । गमेर्डो इति व्युत्पत्त्या **गो**शब्दस्य सकलजङ्गमवाचित्वप्रसङ्गात्; स्थिताया गोः अवाचकत्वप्रसङ्गाच्च । अतः शेषिणि **पति**शब्दो रूढः । अन्यथा, 'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः । अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्' इति पितुः संरक्षके पुत्रे पतिशब्दव्यवहारप्रसङ्गात्" इत्यूचुः॥

प्रकरणे परमात्मसंबन्धिना धर्माणां बहुत्वमुपलभ्यते । हिततमोपासनकर्मत्वम्, साध्वसाधुकर्मकारयितृत्वम्, 'भूतमाताः प्रज्ञामात्रास्वर्पिताः प्राज्ञामात्राः प्राणेऽर्पिताः' इति अचेतनवर्गाधारचेतनवर्गाधारत्वमानन्दत्वमजरत्वममृतत्वं लोकाधिपतित्वम् एवमादयो हि धर्माः परमात्मसंबन्धिन उपलभ्यन्ते । अतो भूयोधर्मानुग्रहायास्य प्रकरणस्य परमात्मपरत्वमेव वक्तव्यम् । तर्हि इन्द्रस्य, 'मामुपास्स्व' इति निर्देशः कथमुपपद्यत इत्यत्राह—"शास्त्रदृष्ट्या तूपदेशो वामदेववत्" । 'य आत्मनि तिष्ठन् आत्मनोऽन्तरः' इत्यादिशास्त्रेण परमात्मानं स्वात्मानं दृष्ट्वा शरीरवाचिनाश्च शब्दानां शरीरिपर्यन्ततां ज्ञात्वा, मामुपास्स्वेत्युपदिष्टवान् । यथा हि साक्षात्कृतस्वात्मभूतपरमात्मतत्त्वो वामदेवः, 'अहं मनुरभवं सूर्यश्च' इति स्वात्मनि मन्वादिभावमुपदिष्टवान्—न हि तत्र मन्वादिभावः स्वस्वरूपगतो वामदेवेनोपदिष्टः ; अपितु स्वात्मभूतपरमात्मगतः — तद्वदेवायमुपदेश इति भावः । "जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासनात्रैविध्यादाश्रितत्वादिह तद्योगात्" । त्वाष्ट्रवध-वक्तृत्वादिजीवलिङ्गानाम् आयुःप्रमुखशरीरोत्थापकत्वेन्द्रियाश्रयत्वादीनां मुख्यप्राणलिङ्गानां चोपन्यासः किमर्थ इति चेत्—इन्द्ररूपजीवशरीरकतया प्राणरूपाचेतनशरीरकतया स्वरूपेण चोपासनार्थं चेतनाचेतनधर्माणां ब्रह्मधर्माणाञ्च कीर्तनम् । त्रिविधश्चोपासनं प्रकरणान्तरेष्वप्याश्रितम्, यथा तैत्तिरीयके, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति स्वरूपेण, 'सच्च त्यच्चाभवत्' इति भोक्तृभोग्यलक्षणचेतनाचेतनशरीरकतया चोपासनम् । एवमिहाप्युपासनात्रैविध्यं युज्यत इति स्थितम् ॥ ६७ ॥

इति कौषीतक्युपनिषदि तृतीयाध्यायप्रकाशिका ।

अथ चतुर्थोऽध्याय

गार्ग्यो हवे बालाकिरनूचान सस्पष्ट आस ॥ १ ॥
सोऽवसदुशीनरेषु सत्त्वमत्स्येषु कुरुपाञ्चालेषु काशीविदेहेष्विति ॥
स हाजातशत्रु काश्यमेत्योवाच ॥ ३ ॥, ब्रह्म ते ब्रवाणीति ।
त होवाचाजातशत्रु, 'सहस्र दद्म एतस्या वाचि जनको जनक

गार्ग्यो ..आस। बलाकस्यापत्य बालाकि', गोत्रतो गार्ग्यः, **अनूचानः** अङ्गाध्यायी । 'अङ्गाध्यायनूचान' इति स्मृते । **सस्पष्टः** सम्यक् विद्यया प्रख्यात —एवम्भूतस्सन् आस बभूव ॥ १ ॥

सो इति । सः बालाकि उशीनरेषु सत्त्वप्रचुरमत्स्य देशेषु कुरुपाञ्चालेषु काशीविदेहेषु उवास (?) उषितवान्। **इति**शब्द प्रकारवचन । एवञ्जातीयकेष्व-येष्वपीत्यर्थ ॥ २ ॥

स...उवाच । अजातशत्रुनामान काशीराजमभिगत्योवाच ॥ किमिति ? ब्रह्म ते ब्रवाणीति ।

त होवाच.. धावन्तीति । एतस्यामेव वाचि निमित्ते गवा

समन्वयाध्याये चतुर्थपञ्चमे 'जगद्वाचित्वात्' इति सूत्रेण एत त्कौषीतकिश्रुतिगतस्य, 'यस्य वैतत् कर्म इति कर्मपदस्यार्थनिर्धारणात् तदधिकरण कौषीतकिबालाक्यजातशत्रुसवादमेव प्राधान्येनाधिकृत्य प्रवृत्तम् न तु बृहदारण्यकगत तम् । स तु, 'अपि चैवमेके' इति तत्रैव सूत्रखण्डेन स्पृष्ट ।

यनूचान अङ्गाध्यायीति। अङ्गिभूतस्वाध्यायाध्ययनसमर्थसिद्धम् ॥२

जनको जनक इति द्वि प्रयोगेऽर्थविशेषमभिसहित दर्शयति जनक एव ब्रह्म शुश्रूषु दाता चेति ॥ ४

इति ह वै जना धावन्ति' इति ॥ ४ ॥

स होवाच बालाकिः, 'य एवैष आदित्ये पुरुषः, तमेवाहमुपासे' इति ॥ ५ ॥ तं होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः ।

सहस्रं प्रयच्छामि(म ?)। सर्वेऽपि ब्रह्मविद , जनक एव ब्रह्म शुश्रुषु· दाता चेति जनकस्य समीपमेव धावन्ति । भवास्तु मत्समीपमागत्य, ब्रह्म ते ब्रवाणीत्युक्तवान् । अनेनैव वाक्येन तोषिता वयं सहस्रं प्रयच्छाम इति भावः ॥ ४ ॥

स . उपास इति । आदित्यमण्डलान्तर्वर्तिन पुरुषं ब्रह्मेत्यह मुपासे । अत त्वमपि तमेवोपास्स्वेति भाव ॥ ५ ॥

त ह ... । मा मा प्रति एतस्मिन् आदित्यवर्तिपुरुषविषये सवादं मा कारय । अज्ञाते हि विषये सवाद कारयितव्य । अयं तु

अब्रह्मज्ञेन बालाकिना आदित्यपुरुषादयः षोडश क्रमेण ब्रह्मत्वेन कीर्त्यन्ते, य एवैष आदित्ये पुरुष इत्यादिना । ब्रह्म ते ब्रवाणीत्युपक्रमात् तमेवाहमुपासे इति सर्वत्र ब्रह्मत्वेनोपासनं विवक्षितम्। अजातशत्रुस्तु यथावस्थितब्रह्मवेदित्वात् तदनभ्युपगमेन मा मेतस्मिन् संवादयिष्ठाः इत्याह । तदर्थश्च मद्विदितार्थसंवादानुकूलव्यापारवान् मा भूरिति । आदित्यपुरुषादितत्त्वं मया सुज्ञातम् । त्वया च तदन्यथा ज्ञातम् । अतः त्वदीयो वादः मदभिमतस्य संवादो न भवति । संवादापेक्षा च अन्यथा गृहीतांशत्यागेन वास्तवांशशिक्षार्थं भवेत् अपेक्षकस्यासत्वे । अहं तु सम्यग् जानामि; त्वमेव त्वन्यथा गृहीतवानसि । अतो मम संवादसंवत्सये त्वया न व्यापरितव्यमिति भावः । संवादं मा कारयेति । मदर्थस्य संवादः त्वत्तोऽधिगत इति मदुक्तये मा

बृहन् (त्) पाण्डरवासाः अतिष्ठाः सर्वेषां भूतानां मूर्धेति वा अहमेतमुपासे इति ॥ ६ ॥ स यो हैतमेवमुपास्ते, अतिष्ठाः सर्वेषां भूतानां मूर्धा भवति'। स होवाच बालाकिः, 'य एवैष चन्द्रमसि पुरुषः, तमेवाहमुपास' इति। तं होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः। सोमो राजा अन्नस्यात्मेति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते, अन्नस्यात्मा भवति' ॥ ७ ॥

स होवाच बालाकिः, 'य एवैष विद्युति पुरुषः, तमेवाहमुपासे' इति। तं होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः। तेज-

ज्ञात एव। कथमित्यत्राह, **बृहन् पाण्डरवासाः सर्वेषां भूतानां मूर्धेति वा अहमेतमुपास'** इति। वेशब्दोऽवधारणे। **बृहन्** महान्। पाण्डराणि किरणरूपाणि वासांसि यस्य स **पाण्डरवासाः**। आदित्यकिरणानां नानारूपत्वात् पाण्डरवासस्त्वमिति द्रष्टव्यम्। बृहदारण्यके बालाक्यजातशत्रुसंवादे बृहत्त्वपाण्डरवासस्त्वे चन्द्रधर्मतया उक्ते; इह तु आदित्यधर्मतया उक्ते इति विशेषः। **अतिष्ठाः** सर्वमपि कार्यमतिक्रम्य तिष्ठतीति अतिष्ठाः। सर्वेषां भूतानां **मूर्धा** श्रेष्ठः ॥ ६ ॥

तदुपासनस्यानुरूपं फलमाह **स यो . भवति। स होवाच . भवति।** अन्नस्य व्रीहियवादिरूपौषधिवर्गस्य। आत्मा। प्रियत्वाद्वा, चन्द्रमसः सर्वरसात्मत्वेन तत्स्वरूपत्वाद्वा, अमावास्यायां चन्द्रस्य सर्वौषध्यनुप्रवेशश्रवणाद्वा चन्द्रस्य अन्नात्मत्वम् ॥ ७ ॥

यतस्त्वेत्यर्थः। अज्ञाते हीति। अत्र वक्तव्यं बृहदारण्यकपरिष्कारे द्रष्टव्यम्। यद्वा संवादः संमतिः। विषयस्य मया अज्ञानत्वे हि त्वदुपदेशमङ्गीकुर्याम्, त्वञ्च मामङ्गीकारयेः। ज्ञातत्वात्तु विपरीतार्थं त्वदुक्तं न संमन्येयेत्यर्थः ॥

स्यात्मेति वा अहमेतमुपासे इति। स यो हैतमेवमुपास्ते, तेजस्यात्मा भवति' ॥ ८ ॥

स होवाच बालाकिः, 'य एवैष स्तनयित्नौ पुरुषः, तमेवाहमुपासे' इति। तं होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः। शब्दस्यात्मेति वा अहमेतमुपासे इति। स यो हैतमेवमुपास्ते, शब्दस्यात्मा भवति' ॥ ९ ॥

स होवाच बालाकिः, 'य एवैष आकाशे पुरुषः, तमेवाहमुपासे' इति। तं होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः। पूर्णमप्रवर्ति ब्रह्मेति वा अहमेतमुपासे इति। स यो हैतमेवमुपास्ते, पूर्यते प्रजया पशुभिः। नो एव स्वयम्। नास्य प्रजा पुरा कालात् प्रवर्तते' ॥१०

स होवाच बालाकिः, 'य एवैष वायौ पुरुषः तमेवाहमुपासे इति। तं होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः। इन्द्रो

तेजस्यात्मा तेजस्विस्वरूप इत्यर्थः। तेजस आत्मेति पाठेऽपि स एवार्थः ॥ ८ ॥ **शब्दस्यात्मा**। स्तनयित्नुसहितस्य मेघस्य शब्दप्रधानत्वात् शब्दात्मत्वम्। शिष्टं स्पष्टम् ॥ ९ ॥

पूर्णत्वविशिष्टोपासनायाः फलम्, **पूर्यते प्रजया पशुभिरिति।** पूर्णत्वप्रयुक्तनिर्व्यापारत्वलक्षणाप्रवर्तित्वविशिष्टोपासनायाः फलम्, **नो एव स्वयमित्यादि।** स्वयमपि, तत्पुत्रपौत्रादिकं वा न शास्त्रानुशिष्टशतायुष्ट्कालात् प्राक् अस्माल्लोकात् प्रवर्तते। नास्य सन्ततावपमृत्युर्भवतीत्यर्थः॥

इन्द्रः ईश्वरः। 'योऽयं पवते एष देवाना गृहाः' इति वायो-

पूर्णमप्रवर्तीति। छान्दोग्ये गायत्रीविद्यायां (३-१२) मोक्षफलकं पूर्णत्वाद्युपासनमुक्तम्। तत्राप्याकाशः प्राक् प्रस्तुतः; ब्रह्मतुल्यतया कीर्तितश्च ॥

वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति। स यो हैतमेव-मुपास्ते, जिष्णुर्हवा अपराजिष्णुरन्यतस्त्यजायी भवति'॥ ११॥

स होवाच बालाकिः, 'य एवैषोऽग्नौ पुरुषः तमेवाहमुपासे' इति। त होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः। विषासहि-रिति वा अहमेतमुपासे इति। स यो हैतमेवमुपास्ते विषासहिर्हवैष भवति'॥ १२॥

स होवाच बालाकिः, 'य एवैषोऽप्सु पुरुष, तमेवाहमुपास इति। तं होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः। नाम्न-स्त्यात्मेति वा अहमेतमुपासे इति। स यो हैतमेवमुपास्ते, नाम्न-स्त्यात्मा भवति'॥ १३॥

इत्यधिदैवतम्। अथाध्यात्मम्॥ १४॥—

स होवाच बालाकि, 'य एवैष आदर्शे पुरुष, तमेवाहमुपासे' इति। त होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः। प्रतिरूप

देवलोकत्वप्रसिद्धे लोकत्वेन वैकुण्ठसादृश्याद्वैकुण्ठत्वम्। मरुतां गणत्व-प्रसिद्धे सेना। जिष्णुः जयशील। अपराजिष्णुः अपराजित। अन्यतस्त्यजायी। अन्यतो भवा अन्यतस्त्या। शत्रव इति यावत्। तान् जेतुं शीलमस्य। 'सुप्यजातौ' इति णिनि। शिष्टं स्पष्टम्॥ ११

विषासहिः। सोढुमशक्य शत्रुभिरित्यर्थ। मर्षयितेति वाऽर्थ॥

नाम्नस्त्यात्मा। नामाधिष्ठात्री देवतेत्यर्थ। शिष्टं स्पष्टम्॥१३॥

इत्यधिदैवतम्। अथाध्यात्मम्। देवतायामुपासनप्रकार उक्त। आत्मन्युपासनप्रकार उच्यत इत्यर्थ॥ १४॥

प्रतिरूपः। प्रतिबिम्ब इत्यर्थ। अस्य सन्नायामनुरूप एव पुत्रो जायते। नाननुरूप। प्रतिबिम्बस्य कार्यकारणसघातस्य चात्म-

इति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते, प्रतिरूपो हैवास्य प्रजा स्वयमाजायते : नाप्रतिरूप:' ॥ १५ ॥

स होवाच बालाकिः, 'य एवैष प्रतिश्रुत्कायां पुरुषः, तमेवाहमुपास' इति। तं होवाचाजातशत्रुः, 'मामैतस्मिन् संवादयिष्ठाः, द्वितीयोऽनपगम इति वा अहमेतमुपास इति। स यो हैतमेवमुपास्ते, विन्दते द्वितीयाम् ; द्वितीयवान् भवति' ॥ १६ ॥

स होवाच बालाकिः, 'य एवैष शब्दः पुरुषमन्वेति, तमेवाहमुपास' इति। तं होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः,

---

शब्दिताभिन्नत्वादध्यात्मान्तर्गतत्वमिति द्रष्टव्यम् ॥ १५ ॥

प्रतिश्रुत्कायां प्रतिध्वनौ। **द्वितीयः** पूर्वशब्दापेक्षया द्वितीयः। **अनपगमः** नापगच्छतीत्यनपगमः। **द्वितीयाम्** आत्मापेक्षया द्वितीयां भार्यां **विन्दते** लभत इत्यर्थः। **द्वितीयवान् भवति**। पुत्रेण द्वितीयवांश्च भवतीत्यर्थः। **विन्दते द्वितीयमिति** पाठे **द्वितीयं** पुत्रं **विन्दते**। अनपगमत्वोपासनाफलमुच्यते **द्वितीयवान्** भवतीति नित्ययोगे मतुप्। नित्यं पुत्रसहितो भवतीत्यर्थ ॥ १६ ॥

पुरुषमन्वेति। गुहादौ पुरुषशब्दानुकारिवर्णात्मकः **प्रतिशब्द** इत्यर्थ.। **असुरिति वा अहमेतमुपास इति**। तादृशशब्दस्य प्राणबल-

---

प्रतिरूपो हैवास्य प्रजेति। 'बिम्बादिवोत्थितौ बिम्बौ रामदेहात् तथा परौ' इत्युक्तरीत्या स्वप्रतिबिम्बवत् स्वप्रजा भवतीत्यर्थः। तत्र शरीरसाम्यमात्रं न विवक्षितम् ; किंतु सर्वांशतः इत्याशयेन अनुरूप एव पुत्रो जायते इत्युक्तम् ॥ १५

प्रतिश्रुत्कायामिति । प्रतिश्रुत्कापदेन प्रतिश्रुज्जनकदिग्ग्रहणं युक्तम् ; श्रुत्यन्तरे समानप्रकरणे दिक्षु इति श्रवणात् ॥ १६

असुरिति वा अहमेतमुपासे इति । स यो हैतमेवमुपास्ते, नो एव स्वयम्, नास्य प्रजा पुरा कालात् संमोहमेति' ॥ १७ ॥

स होवाच बालाकिः, 'य एवैष च्छायायां पुरुषः, तमेवाहमुपासे इति । तं होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः । मृत्युरिति वा अहमेतमुपासे इति । स यो हैतमेवमुपास्ते, नो एव स्वयम्, नास्य प्रजा पुरा कालात् प्रमीयते' ॥ १८ ॥

स होवाच बालाकिः, 'य एवैष शारीरः पुरुषः, तमेवाहमुपासे' इति । तं होवाचाजातशत्रुः, 'मा मैतस्मिन् संवादयिष्ठाः । प्रजापतिरिति वा अहमेतमुपासे इति । स यो हैतमेवमुपास्ते, प्रजायते प्रजया पशुभिः' ॥ १९ ॥

स होवाच बालाकिः, 'य एवैष प्राज्ञ आत्मा येनैतत्सुप्तः स्वप्न्याचरति, तमेवाहमुपासे' इति । तं होवाचाजातशत्रुः, 'मा मैतस्मिन्

लभ्यतया असुरित्युपासे इत्यर्थः । नो....एति । स्वयं वा तत्सन्ततिर्वा अकाले मूर्च्छां मरणं[वा ?]न प्राप्नोतीत्यर्थः ॥ १७ ॥

मृत्युरिति वा इति । नीलत्वभयङ्करत्वादिमृत्युसादृश्यात् छायापुरुषस्य मृत्युत्वेनोपासनमिति द्रष्टव्यम् ॥ १८ ॥

शारीरः । शरीरे अहमित्यभिमन्यमानः पुरुषः शारीरः । तस्य पुत्रपौत्रादिलक्षणप्रजोत्पादकत्वरक्षकत्वादिना प्रजापतित्वम् । प्रजया पशुभिः प्रजायते । प्रजया पशुभिश्च प्रकृष्टो जायत इत्यर्थः । शिष्टं स्पष्टम् ॥ १९ ॥

स होवाच । प्राज्ञः जाग्रद्दशायां प्रज्ञाशाली अयमात्मा एतत्सुप्तः—एतत् सुप्तं यस्य—एतादृशसुप्तिविशिष्टस्सन्—उपरतबाह्येन्द्रिय इति यावत्—येन स्वप्न्याचरति येन मनसा विशिष्टस्सन्

संवादयिष्ठा. । यमो राजेति वा अहमेतमुपास इति । स यो हैतमेवमुपास्ते, सर्वं हास्मा इदं श्रैष्ठ्याय यम्यते' ॥ २० ॥

स्वमाय प्रवर्तते स्वमात् (स्वमान् ?) पदार्थान् पश्यति, तत् मनो ब्रह्मोपास इत्यर्थ । यमः— । सर्वेन्द्रिययमयितृत्वात् मनसो यमत्वम् , श्रैष्ठ्याच्च राजत्व द्रष्टव्यम् । श्रैष्ठ्याय यम्यते । अस्य श्रैष्ठ्याय सर्वमपि भूतजातं यम्यते । यमत इति यावत् ॥ २० ॥

स्वमायेत्यत्र स्वप्नयेति पाठान्तरम्। 'आङ्याजयारामैमुपसंख्यानम्' इति (७-१-३९) पाणिनीयवार्तिकात् स्वनेनेत्यत्र स्वप्नयेति अयाच् ।

तन्मनो ब्रह्मोपास इति । ननु तमेवाहमुपासे इति पुल्लिङ्गतच्छब्दश्रवणात् प्राज्ञस्यात्मनो ग्रहण युक्तम् । पूर्वोत्तरवाक्येषु च य एवेष इति यच्छब्दगृहीतस्यैव तमेवाहमुपास इति उपास्यत्वेन ग्रहणात् इहापि तादृशस्य प्राज्ञात्मन एवोपासिकर्मत्वे वर्णनीये मनस उपासनवर्णन कथमिति चेत्—उच्यते । अस्ति विशेष. । तथाहि—सर्वेष्वपि पर्यायेषु पुरुषविशेषाणामुपास्यत्वमुक्तम्। तद्वदिह, 'यः पुरुषस्तमेवाहमुपासे' इति न श्रूयते । प्राज्ञस्यात्मन उपासनान्वयस्तु स्यात्, यदि अनुपपत्तिर्न स्यात् । यद्यय प्राज्ञ आत्मा परमात्मा, तर्हि तस्य ब्रह्मत्व प्रामाणिकमिति तस्याब्रह्मत्वमजातशत्रुविवक्षितमयुक्त स्यात् । अथ जीवात्मा, तर्हि, य एवैष शारीरः पुरुष इति पूर्वपर्यायानातिरिच्यते । किञ्च य एवैष इति यच्छब्दप्रतिसंबन्धी चेत् तमिति तच्छब्दः, तर्हि येनेत्यस्य कः प्रतिसंबन्धी । अत. य एवैष प्राज्ञ आत्मा, स एतस्मिन्नस्मिन् येन मनसा चरति, तदुपासनमहं करोमीत्युच्यते । तमिति पुल्लिङ्गनिर्वाहः कथमिति चेत्; मनसो मन पदेनैव ग्रहणनियमाभावात्, येन करणविशेषेणेत्यर्थवर्णनसंभवादनुपपत्त्यभावात् । ननु ब्रह्मशब्दस्य मन.परत्वमत्र पूर्वाध्याये

स होवाच बालाकि, ‘य एवैष दक्षिणेऽक्षन् पुरुष तमेवाहमुपासे’ इति। त होवाचाजातशत्रु, ‘मा मैतस्मिन् सवादयिष्ठा । नाम्न आत्मा अग्नेरात्मा ज्योतिष आत्मेति वा अहमेनमुपासे इति। स यो हैतमेवमुपास्ते, एतेषा सर्वेषामात्मा भवति’।

स होवाच बालाकि, ‘य एवैष सव्येऽक्षन् पुरुषस्तमेवाहमुपासे’ इति। तं होवाचाजातशत्रु, ‘मा मैतस्मिन् सवादयिष्ठा ।सत्यस्यात्मा विद्युत आत्मा तेजस आत्मेति वा अहमेतमुपासे इति। स यो हैतमेवमुपास्ते, एतेषा सर्वेषामात्मा भवति’ ॥ २१ ॥

स ह आत्मा भवति । दक्षिणाक्षिप्रतिबिम्बे नामाग्निज्योतिरात्मत्वदृष्टौ नामाग्निज्योतिरात्मत्व भवति । स याक्षिप्रतिबिम्बे सत्यविद्युत्तेजआत्मत्वबुद्धौ सत्यविद्युत्तेजआत्मत्व भवति ॥ २१ ॥

दृष्टम् । अत प्राज्ञ आत्मेति मनोधिष्ठातृदेवताविशेषो गृह्यताम् । येनेति पदमपि तत्परमेव । प्राज्ञ आत्मेत्यत्र प्रज्ञात्मेत्यपि पाठ स्यात् । बहुत्र तथाश्रवणात् । तथा च सुप्त येन देवताविशेषेण स्वप्नाय चरति, एष प्राज्ञ आत्मा य तमुपास्ते इत्यर्थोऽस्तु । एवञ्च स इति पदानध्याहार, एतेषा पुरुषाणा एतति वक्ष्यमाणवाक्ये अस्यापि पुरुषत्वेन कीर्तनौचित्यश्चेति चेत्—अस्तु कामम् । प्रश्नभाष्यस्यापि तदर्थपरताया नातीव क्लेश इति । ननु बृहदारण्यके शारीरात्ममात्र कथितम् , न प्राज्ञात्मदक्षिणवामाक्षिपुरुषत्रयम् । तत्तत्रोक्तस्य शारीरात्मन एव चतुर्धा किञ्चिद्रूपेण विभाग इहाभिमतोऽस्तु । अतो न मन परोऽय प्राज्ञात्मपर्याय इति चेत्—न—अयमेवोक्तमेवात्र वक्तव्यमिति निर्बन्धाभावात् । अस्तु वा तमिति पद येनेति प्र गुक्तमनोविशिष्टवेषेण जीवपरम् । तन्मनो ब्रह्मोपास इति भाष्यञ्च पुरुषविशेषणतया मनसोपि विलक्षणादर्शकम्, न तु पुरुषस्योपास्यत्ववारकमिति ॥ २०

ततो ह बालाकिस्तूष्णीमास ॥ २२ ॥

तं होवाचाजातशत्रुः, 'एतावन्नु बालाके' इति ॥ २३ ॥

एतावद्धीति होवाच बालाकिः ॥ २४ ॥

तं होवाचाजातशत्रुः, 'मृषा वै किल मा संवादयिष्ठाः ब्रह्म ते ब्रवाणीति ॥ २५ ॥

स होवाच, 'यो वै बालाके एतेषां पुरुषाणां कर्ता, यस्य वैतत् कर्म, स वै वेदितव्यः' इति ॥ २६ ॥

तूष्णीमास । उत्तरापरिस्फूर्तेरिति शेषः ॥ २२ ॥

एतावन्नु बालाक इति । हे बालाके ! एतावदेव खलु ते विदितमित्यर्थः ॥ २३ ॥

एतावद्धीति । एतावदेव मे विदितमित्युवाचेत्यर्थः ॥ २४ ॥

मृषा वै.... । ब्रह्म ते ब्रवाणीति मृषोक्त्या मा मृषैव संवादयिष्ठाः संवादं कारितवानसि । एतावन्तं कालमब्रह्मवाद एव प्रवृत्त इत्यर्थः॥२५॥

तर्हि किं तत् वेदितव्यं ब्रह्मेत्यत्राह स होवाच यो वै... वेदितव्य इति । वैशब्दोऽवधारणे । त्वया ब्रह्मत्वेनोपदिष्टानामादित्यादि-पुरुषाणां यः कर्ता = ते यत्कार्यभूताः ; किं विशिष्याभिधीयते ; यस्य प्रत्यक्षादिसन्निधापितं चिदचिद्रूपं समस्तं जगत् कर्म कार्यम्— 'क्रियत इति व्युत्पत्त्या कर्मशब्दः कार्यवचनः. स एव वेदितव्यः ; न तु त्वदुपन्यस्ता आदित्यादय इति भावः ॥ २६ ॥

मृषा वै किलेति । अतस्त्वं यथमगिग्न इव मत्संमतिं प्रतीक्षितवानिति भावः । २५

एतेषां पुरुषाणां कर्तृत्वेन सर्वदेवस्रष्टृत्वमुपग्रहणं मा भूदिति व्यष्टिसमष्टिभूतसर्वप्रपञ्चहेतुपरब्रह्मग्रहणव्यक्त्यै यस्य वैतत्

तत उ ह बालाकिः समित्पाणिः प्रतिचक्राम, उपायानीति ॥२७॥
तं होवाचाजातशत्रुः, 'प्रतिलोमरूपमेव स्यात् यत् क्षत्रियो ब्राह्मणमुपनयेत् (नयीत)। एहि व्येव त्वा ज्ञपयिष्यामीति ॥ २८ ॥
तं ह पाणावभिपद्य प्रवव्राज ॥ २९ ॥

तत उ ... उपायानीति। उशब्दोऽवधारणे। हशब्दः प्रसिद्धौ। एवमजातशत्रुणोक्तो बालाकिर्गताभिमानो, 'नीचादप्युत्तमां विद्याम्,' 'आपत्कल्पो ब्राह्मणस्याब्राह्मणात् विद्योपयोगः' इति शास्त्रमनुसृत्य क्षत्रियादप्यजातशत्रोर्विद्यामुपादित्सुः, 'नानुपसन्नाय ब्रह्मोपदेष्टव्यम्' इति शास्त्रं जानन् समिद्भारहस्तः शिष्यस्सन्, उपगच्छामीति प्रवृत्तः॥२७

प्रतिलोम.. ज्ञपयिष्यामीति। क्षत्रियो ब्राह्मणमुपनयेत्' इति यत्, तत् विपरीतरूपमेव स्यात्। अत एहि त्वामुपनयनमन्तरेणैव ब्रह्म विज्ञापयिष्याम्येव ॥ २८ ॥

तं ह ... प्रवव्राज। तं बालाकिं पाणौ गृहीत्वा निर्गत इत्यर्थः॥

कर्मेत्युक्तम्। वाशब्दः एतेषां पुरुषाणां कर्तेति वाक्यकृतोपपादनानादरप्रदर्शनार्थः। बालाक्यधिकरणपूर्वपक्षिपक्षे वाशब्दो न युक्तः किंतु चशब्दः। पुरुषाणां कर्तेत्युक्तार्थोपपादकपुण्यरूपकर्मपरत्वाद् वाक्यस्य। अत एव तत्र, 'पुण्यापुण्यलक्षणं च कर्म यस्य' इति श्रीभाष्यम्। यस्य कर्मत्वस्य यत्समवेतकृतिविषयभूतमित्यर्थः। क्रियमाणं सृज्यमानमेतत् सर्वं यस्येत्यन्वये तु जगत् यत्कृतिविषयभूतमित्येव षष्ठ्या शेषत्वार्थनिरस्तोऽपि स्यात्। पूर्वोक्तोऽर्थः स्वरसः॥

प्रतिलोमरूपमिति। पण्डितरूपवेदनीयमित्यादावपि अतिशये रूपप्रत्ययः। अतीव प्रतिलोममित्यर्थः। २८

प्रवव्राजेति संन्यासे प्रसिद्धमपीह तावदविवक्षया प्रयुक्तम्। २९

तौ ह सुप्तं पुरुषमीयतुः ॥ ३० ॥

तं हाजातशत्रुरामन्त्रयाञ्चक्रे, 'बृहन् (त्) पाण्डरवासः सोमराजन्निति ॥ ३१ ॥

तौ ह सुप्तं पुरुषमीयतुः। तौ बालाक्यजातशत्रू राजभवने सुप्तं कञ्चित् पुरुषं प्राप्तवन्तावित्यर्थः । बालाक्यधिकरणभाष्ये, 'तौ ह सुप्तं पुरुषमाजग्मतुः' इत्युदाहृतं वाक्यं बृहदारण्यकगतम् ; नैतच्छाखागतम् । अत एव तत्र व्यासार्यैः, "तौ ह सुप्तं पुरुषमीयतुः इति श्रुतिः" इत्युक्तम् ॥

बृहन् पाण्डरवासः सोमराजन् । 'प्राणो वाव ज्येष्ठः श्रेष्ठश्च' इति ज्यैष्ठ्यश्रैष्ठ्यगुणेन प्राणस्य बृहत्त्वात् बृहन्नित्यामन्त्रणम् । पाण्डरवासस्त्वं च प्राणधर्मः । किं मे वासः' इति प्राणेन पृष्टे, 'आपो वासः' इति अपां प्राणवासस्त्वोक्तेः । तासाञ्चापाम्, 'यच्छुक्लम्, तदपाम्' इति शुक्लवर्णाश्रयत्वात् पाण्डरत्वं युक्तम् । सप्तान्नब्राह्मणे, 'अथैतस्य प्राणस्याऽऽपः शरीरं ज्योतीरूपमसौ चन्द्रः' इति प्राणस्य चन्द्रसंबन्धप्रतीतेः लक्षणया सोमेति प्राणस्य संबोधनम् । 'प्राणो वै सम्राट्' इति श्रवणात् राजन्नित्यामन्त्र्यत इति व्यासार्यैरुक्तम् ॥ ३१ ॥

ननु बालाक्यधिकरणस्य कौषीतकिश्रुतिविषयकतायाः प्रागेवोक्तत्वात् तत्र च भगवता भाष्यकृता आजग्मतुरित्येव पठितत्वात् कथम् ईयतुरिति पठित्वा व्याख्यायत इत्यत्राह बालाक्यधिकरणभाष्ये इति । ३०

बृहन् पाण्डरवासः सोमराजन् इति । अत्र कर्तव्यो विचारः सर्वः बृहदारण्यकभाष्यपरिष्कारयोर्द्रष्टव्यः। सम्राट् पदविषयश्च । ३१

स उ ह तूष्णीमेव शिश्ये ॥ ३२ ॥
तत उ हैनं यष्ट्या विचिक्षेप ॥३३॥ स तत एव समुत्तस्थौ ॥३४॥
तं होवाचाजातशत्रु, 'क्वैष एतद्बालाके पुरुषोऽशयिष्ट? क्व(क्व वा ए) तदभूत्? कुत एतदागात्' इति ॥ ३५ ॥

स उ ह तूष्णीमेव शिश्ये । अनुत्थित एव यथापूर्वमशयिष्टेत्यर्थः ॥
तत उ हैनं यष्ट्या विचिक्षेप । सुप्तं यष्ट्या ताडितवानित्यर्थः ॥
स तत एव समुत्तस्थौ । दण्डताडनादेव समुत्तस्थौ । न तु प्राणनामाम न्त्रणादिनेत्यर्थः । प्राणनामभिरामन्त्रणेऽप्यनुत्थानप्रदर्शनं प्राणान्यत्वज्ञापनार्थम्। सुषुप्तिदशायामुपरतव्यापारेभ्य शरीरेन्द्रियेभ्योऽन्यत्वं सुज्ञानमपि, तस्यामपि दशायामनुपरतव्यापारात् प्राणादन्यत्वं ज्ञापनीयमिति । प्राणनामभिरामन्त्रणेऽप्यनुत्थानेन दण्डताडनोत्थानेन च जीवस्य प्राणव्यतिरेको दर्शितः ॥ ३४ ॥

एवं देहेन्द्रियमनःप्राणव्यतिरिक्तं जीवं प्रदर्श्य ततोऽतिरिक्तं परमात्मानं बोधयितुमाह तं होवाच । हे बालाके! एष पुरुषः अशयिष्ट इत्येतत् क्व इति स्वप्नस्थानप्रश्नः । यद्वा, एतच्छब्दः स्वप्नपरः । अशयिष्टेत्येतत् प्रत्ययार्थमात्रपरम् । क्व एतत् स्वप्नमकृतेत्यर्थः । सर्वथा स्वप्नस्थानप्रश्नः । क्व वा एतदभूदिति सुषुप्तिस्थानप्रश्नः । एतच्छब्दस्य नपुंसकलिङ्गत्वेऽपि प्रकृतवाचिनःश्रुतिस्वारस्यात् प्रकृतपुरुष

यष्ट्या विचिक्षेपेति । 'पाणिनापेष बोधयाञ्चकार' इति बृहदारण्यकम् । ३३
स्वप्नमनुभूतमिति पाठे, 'सन्ध्यं स्वप्नं तृतीयं स्थानम्' इति श्रुतिदर्शनात् क्लीबस्यापि साधुत्वं द्रष्टव्यम् । ३५

तदु ह बालाकिर्न विजज्ञौ ॥ ३६ ॥

त होवाचाजातशत्रुः, यत्रैष एतद्बालाके पुरुषोऽशयिष्ट, यत्रैतदभूत्, कुत(यत ?) एतदागात् ॥ ३७ ॥

हिता नाम हृदयस्य नाड्यो हृदयात् पुरीततमभिप्रतिष्ठन्ति । यथा [च] सहस्रधा केशस्यापि पातः तावदण्व्यः पिङ्गलस्याणिम्ना तिष्ठन्ते शुक्लस्य कृष्णस्य पीतस्य लोहितस्येति । तासु तदा भवति ॥

शब्दितजीवपर (रत्वम् ?)। ततश्च क सुप्तोऽभूदित्यर्थ । **कुत एत दागादिति** । अत्राप्येतच्छब्दो जीवपर एव । प्रबोधकालीनजीवो-द्गमनापादानं किमित्यर्थ । ततश्च जीवस्य स्वप्नस्थानसुषुप्तिस्थानोद्गम-नापादानानि पृष्टानि भवन्ति । यद्वा—त्रिष्वपि प्रश्नेषु **एतच्छब्द** सप्त-म्यन्त । एतस्मिन् काल इत्यर्थ । 'सुपां सुलुक्' इति सुपो लुक् । एतस्मिन् काले क स्वप्नमनुभूतम् , एतस्मिन् काले क सुप्त , एतस्मिन् काले कुतो निर्गत इति । एवञ्च त्रयाणामपि **एतच्छब्दा**नामैकरूप्यञ्च सिध्यति ॥

तदु ह बालाकिर्न विजज्ञौ । उत्तरं बालाकिर्न ज्ञातवानित्यर्थ.॥

त होवाचाजातशत्रुः यत्रेत्यादि । उच्यत इति शेष ॥३७

स्वप्नस्थानप्रश्नं प्रतिवक्ति **हिता नाम. तदा भवति** । आत्मनो हितावहत्वात् हिता इति प्रसिद्धा हृदयसन्धिभ्यो नाड्य **हृदयात् पुरीतत** पुरीतदाख्य हृदयान्तर्वर्तिमांसपिण्डविशेषमभिप्रस्थिता भवन्ति । हृदये पुरीतति नद्धा भवन्ति । ततश्च यथा केशस्यापि सहस्रधा पात

आसु तदा भवतीति । ननु जीवातिरिक्तपरमात्मप्रतिबोधनार्थं प्रवृत्तेन अजातशत्रुणा क्वैतदभूदित्यादि पृष्ट्वा व्याख्यानं

यदा सुप्तः स्वप्नं न कथञ्चन पश्यति, अथास्मिन् प्राण एवैकधा भवति। तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः

अतिसूक्ष्म, तावदण्व्यः तथा अण्व्यः सूक्ष्मा पिङ्गलस्य शुक्लस्य कृष्णस्य पीतस्य लोहितस्य अवपीतादिरसस्य अणिम्ना लेशेन पूर्णा तिष्ठति। अतिसूक्ष्मत्वात् लेशेनापि पूर्णा भवन्ति। तासु नाडीषु तदा स्वप्नकाले आश्रितो भवतीत्यर्थः ॥ ३८ ॥

सुषुप्तिस्थानप्रश्नस्योत्तरमाह यदा सुप्तः सहाप्येतीति। सुप्तः—वर्तमाने क्त—स्वपन् सन् यदा उपरतस्वप्नदर्शनो भवति—

नियताम्। स्वप्नस्थानं किमिति प्रथमप्रश्नः तद्विवरणञ्च व्यर्थम्, परमात्मनः सुप्ताधारत्वात्, नाडीनामेव तथात्वात् परमात्म-निरूपणे तदनुपयोगादिति चेत्—उच्यते। 'य एतेषां पुरुषाणां कर्ता यस्य वैतत् कर्म' इत्यनेनैव जीवविलक्षणे ब्रह्मणि उपदिष्टे सिद्धे सुप्तप्रतिबोधनादयर्था प्रवृत्तिरेव किमर्थेति विचारणीयम्। तदुच्यते। बालाकिः स्वोपासितान् पुरुषान् कीर्तयन् शारीरं पुरुषं *जाग्रन् सुप्तञ्च पृथक्पृथक् निर्दिदेश। सुप्तं तु निजध्नौ। तेनायं* मन्यते—जाग्रतः पुंसः सुप्तोऽन्यः, व्याघ्रराजाद्यनेकाभिमानशालि-त्वात् सुप्तस्य। मन्यते हि स्वप्ने, व्याघ्रोऽहम्, महाराजोऽहम्, महा-ब्राह्मणोऽहमित्येवम्। सुषुप्तिकाले तु जीवस्य लीनत्वात् श्वास-प्रश्वासरूपेण तदाऽवस्थितः प्राण एव सुप्तः स्यादिति तस्य पुरुषत्वा-भावादेव सुप्तो न गणनीय इति। अतोऽयं बालाकिः प्रतिबोधनीयः, 'एक एवाऽऽत्मा जागरस्वप्नसुषुप्तीरनुभवति स्थानभेदेन। न च सुप्तः प्राणः। तथासति प्राणनामभिरामन्त्रणे स उत्तिष्ठेत्। न चैवम्' इति। तत्र, 'य एतत् सुप्तोऽभूत्, य एष विज्ञानमयः' इति जाग्रत्सुप्तैक्यं दर्शितम्। *जागरस्थानापेक्षयाऽतिरिक्तं नाडीस्थानं प्राप्य स एव स्वप्नमनुभवति परमात्मानं प्राप्य सुषुप्तिमित्युपदिष्टं भवति।* ३८

सहाप्येति; श्रोत्रं सर्वैः शब्दैः सहाप्येति; मनः सर्वैर्ध्यानैः सहाप्येतीति ॥ ३९ ॥

स यदा प्रतिबुध्यते, यथा अग्नेर्विस्फुलिङ्गाः विप्रतिष्ठेरन्,

यदाशब्दानुरोधात् तदाशब्दोऽध्याहर्तव्यः — अथ स्वप्नानन्तरं अस्मिन् प्राणे प्राणशरीरके परमात्मनि एकधा भवति । एकधाभावो नाम— जाग्रदाद्यवस्थाजनितदेहात्माभिमानकृतरागद्वेषादिलक्षणकालुष्यादिराहित्येनावस्थानम् । 'सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति' इत्यादौ प्राणशब्दस्य परमात्मनि प्रचुरप्रयोगात्, वाजसनेयके समानप्रकरणे, 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इति आकाशशब्दितस्य सुषुप्त्याधारत्वश्रवणाच्च आकाशप्राणशब्दयोः परमात्मपरत्वमन्तरेणा विरोधासंभवात्, 'सता सोम्य तदा संपन्नो भवति', 'सति संपद्य न विदुः', 'प्राज्ञेनात्मना संपरिष्वक्त' इति परमात्मनः सुषुप्त्याधारत्वस्य श्रुत्यन्तर(रे?)श्रवणाच्च प्राणशब्दो योगेन वा अपर्यवसानवृत्त्या वा ब्रह्मपरः । परमात्मनो बुद्धिस्थत्वात् अस्मिन् इति निर्देशोऽप्युपपद्यते । अथ (तदा ?) तदुत्तरक्षण एव परमात्मानम् अपियन्तं जीवं वागादीन्द्रियाण्यपि [तत्] सकार्येण सहापियन्तीत्यर्थः । नामशब्दो नामाभिलपनपरः । रूपगन्धशब्दौ तज्ज्ञानौपयिकव्यापारपरौ । रूपशब्दादीनां सुषुप्तौ लयासंभवात् । इन्द्रियव्यापारोपरतेरेव सुषुप्तिशब्दार्थत्वात् ॥ ३९

उद्गमनापादानप्रश्नस्योत्तरमाह स यदा... लोकाः । जीवप्रबोध

यथाग्नेरिति । अत्र, 'यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गाः' इति श्रीभाष्यपाठः । ४०

एवमेवैतस्मादात्मनः प्राणाः यथायतनं विप्रतिष्ठन्ते । प्राणेभ्यो देवाः। देवेभ्यो लोकाः ॥ ४० ॥ तद्यथा क्षुरः क्षुरधाने अवहितः स्यात्, विश्वम्भरो वा विश्वम्भरकुलाये, एवमेवैष प्राज्ञ आत्मा इदं शरीरमात्मानमनुप्रविष्टः आ लोमभ्यः आ नखेभ्यः ॥ ४१ ॥

तमेतमात्मानमेते आत्मानोऽन्ववस्यन्ति ॥ ४२ ॥

दशाया अग्नेर्विस्फुलिङ्गा इव एतस्मात् परमात्मन प्राणशब्दिता जीवा यथास्थान प्रस्थिता भवन्ति । तेभ्यश्च देवशब्दितानि इन्द्रियाणि, एतेभ्यश्च लोकशब्दितानि ज्ञानानि भवन्तीत्यर्थ ॥ ४० ॥

तद् यथा क्षुरः आ **नखेभ्यः** । क्षुरो धीयतेऽस्मिन्निति **क्षुरधानं** क्षुरकोश । तस्मिन् यथा क्षुर **अवहितः** पिहितप्रविष्ट ,— विश्व बिभर्ति वैश्वानराग्न्यादिरूपेणेति **विश्वम्भरो**ऽग्नि — तस्य **कुलाये** नीडे – , एवमेवैष परमात्मा **इद** पुरोवर्तिशरीरम् आलोमभ्य आ नखेभ्य । व्याप्त इत्यध्याहार व्याप्त्या **आत्मान** जीवात्मानमनु**प्रविष्टः** अन्तर्यामितयाऽनुप्रविष्ट इत्यर्थ । तादृशस्य सुषुप्त्याधारत्वोद्गमनापादानत्वे सम्भवन इति भाव । यद्वा इद वाक्य जीवशरीरपरमेव व्याख्येयम । **आत्मानमिदं शरीरम्** आत्मत्वेनाभिमन्यमानमिद शरीरम् आलोमभ्य आनखेभ्य जीवरूपेण प्रविष्ट इत्यर्थ ॥ ४१ ॥

तमेतमात्मानमितर आत्मनोऽन्ववस्यन्ति । एतादृशं परमात्मानम् इतरे जीवा **अन्ववस्यन्ति** अनुवर्तन्ते ॥ ४२ ॥

अवहितः अधस्तात् निहित , अन्तर्हित इति वा । शरीरमात्मानमित्युक्तयोर्भेदात् उभयोः अनुप्रविष्ट इत्यत्रान्वयायोगात् शरीरं व्याप्त आत्मानमनुप्रविष्ट इत्यध्याहारेण प्रथमयोजना । ४१

सहाप्येति ; श्रोत्रं सर्वैः शब्दैः सहाप्येति ; मनः सर्वैर्ध्यानैः सहाप्येतीति ॥ ३९ ॥

स यदा प्रतिबुध्यते, यथा अग्नेर्विस्फुलिङ्गाः विप्रतिष्ठेरन्,

यदाशब्दानुरोधात् तदाशब्दोऽध्याहर्तव्यः — अथ समानन्तरं अस्मिन् प्राणे प्राणशरीरके परमात्मनि एकधा भवति । एकधाभावो नाम— जाग्रदाद्यवस्थाजनितदेहात्माभिमानकृतरागद्वेषादिलक्षणकालुष्यादिराहित्येनावस्थानम् । 'सर्वाणि हवा इमानि भूतानि प्राणमेवाभिसंविशन्ति' इत्यादौ प्राणशब्दस्य परमात्मनि प्रचुरप्रयोगात्, वाजसनेयके समानप्रकरणे, 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इति आकाशशब्दितस्य सुषुप्त्याधारत्वश्रवणाच्च आकाशप्राणशब्दयोः परमात्मपरत्वमन्तरेण विरोधासंभवात्, 'सता सोम्य तदा संपन्नो भवति', 'सति संपद्य न विदुः', 'प्राज्ञेनात्मना संपरिष्वक्तः' इति परमात्मनः सुषुप्त्याधारत्वस्य श्रुत्यन्तर(रे?)श्रवणाच्च प्राणशब्दो योगेन वा अपर्यवसानवृत्त्या वा ब्रह्मपर. । परमात्मनो बुद्धिस्थत्वात् अस्मिन् इति निर्देशोऽप्युपपद्यते । अथ (तदा ?) तदुत्तरक्षण एव परमात्मानम् अपियन्तं जीवं वागादीन्द्रियाण्यपि [तत्] सकार्येण सहापियन्तीत्यर्थः । नामशब्दो नामाभिलपनपरः । रूपशब्दशब्दौ तज्ज्ञानोपयिकव्यापारपरौ । रूपशब्दादीनां सुषुप्तौ ल.भासंभवात् । इन्द्रियव्यापारोपरतेरेव सुषुप्तिशब्दार्थत्वात् ॥३९

उद्गमनापादानपक्षस्योत्तरमाह स यदा .. लोकाः। जीवप्रबोध-

यथाग्नेरिति । अत्र, 'यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गाः' इति श्रीभाष्यपाठः । ४०

स यावद्ध वा इन्द्र एतमात्मानं न विजज्ञौ, तावदेनमसुरा अभिबभूवुः। स यदा विजज्ञौ, अथ हत्वाऽसुरान् विजित्य सर्वेषां देवानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं परीयाय।

सर्वान् पाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति, य एवं वेद। य एवं वेद ॥ ४५ ॥

स यावत्...य एवं वेद। इन्द्रो ब्रह्मविद्यालाभात् प्रागसुरैः पीडितः *इमां ब्रह्मविद्यां लब्ध्वा असुरहननेन विजयी सर्वदेवाधिपत्यं* सर्वदेवश्रैष्ठ्यं **स्वाराज्यशब्दिता**कर्मवश्यत्वलक्षणं च प्राप। अतोऽन्योऽप्येवं वित् सर्वभूताधिपत्यं सर्वभूतश्रैष्ठ्यं पापाहतिपूर्वकमकर्मवश्यत्वलक्षणं **स्वाराज्यशब्दितं** मोक्षञ्च प्राप्नोतीत्यर्थः।

व्यासार्यैस्तु...."**सर्वान् पाप्मनोऽपहत्येत्यनेनापहतपाप्म**त्वादिगुणाष्टकमुक्तम्, जरादीनामपि पाप्मान्तर्गतत्वात्। उक्तं हि वाक्यकारैः, 'स्यु पाप्मानः कालजरामृत्युशोकादयः संख्यातत्वात्' इति। **स्वाराज्यम्** स्वाधीनत्वम्। अतः सत्यकामत्वं सत्यसङ्कल्पत्वञ्चोक्तं भवति। अतः (तत् ?) स्वाराज्यं संसारिभ्योऽस्य श्रैष्ठ्यरूपम् आधिपत्यम्। **अधिपतिः** परमात्मा, 'सर्वस्याधिपतिः' इति श्रुतेः। तत्संबन्धि **आधिपत्यम्**। गुणाष्टकं हि ब्रह्मसंबन्धितया ब्राह्ममुच्यते, "ब्राह्मेण जैमिनिः" इति। अतो ब्रह्मसंबन्धितया तत्साधर्म्यरूपं संसारिभ्यः श्रेष्ठतारूपं यत् स्वाराज्यम्, तदेतीति श्रुतेरर्थः" इत्युक्तम्। **[य एवं वेद।]** *अन्योऽपि य एतामुपनिषदं वेद, सोऽपि ईदृशं फलमाप्नोतीत्यर्थः* ॥ ४५

अन्योऽपि य एतामिति। इदं य एवं वेदेत्यभ्यासस्यार्थवर्णन-

यथा श्रेष्ठिन स्वा ॥ ४३ ॥

तद् यथा श्रेष्ठी स्वैर्भुङ्क्ते, यथा श्रेष्ठिन स्वा· भुञ्जते–एवमेवैष प्राज्ञ आत्मा एतैरात्मभिर्भुङ्क्ते । यथा श्रेष्ठी स्वै , एव वा एतमात्मानोऽन्ववस्यन्ति ॥ ४४ ॥

तत्र दृष्टान्तमाह **यथा श्रेष्ठिन स्वाः** । यथा श्रेष्ठयवन्त स्वा ज्ञातय अनुवर्तन्ते ॥ ४३ ॥

तद् यथा श्रेष्ठी । यथा कश्चित् प्रभु भोगोपकरणभूतै स्वैर्ज्ञातिभि भोगान् भुङ्क्ते यथा स्वाश्च बन्धव त प्रभुमैश्वर्यादि समग्रमनुभूय तद्दत्तानि वित्तादीनि चोपजीव्य हृष्यन्ति—एवमेवाय परमात्मा स्वोपकरणभूतैर्जीवात्मभिर्लीलारस भुङ्क्ते । ते चाऽऽत्मान परमात्मदत्तभोगोपकरणा सर्वैश्वर्यादिगुणविशिष्ट तमनुभूय हृष्टा भवन्ती त्यर्थ । **यथा वा स्वाः श्रेष्ठिन भुञ्जन्तीति** पाठे, यथा प्रधानपुरुष स्वकीयैर्भृत्यादिभि भोगसाधनानि उपहरद्भि हेतुभि भोगान् भुङ्क्ते, यथा च भोगसाधनानि उपहरन्त प्रधानपुरुषं पालयन्ति—एवमित्यर्थ । 'भुज पालने' इति भुजे परस्मैपदित्वादिति ध्येयम् । ईदृश भोक्तृत्व जीवद्वारा वा परमात्मनि योजनीयम् ॥ ४४ ॥

श्रेष्ठ्यवन्तमिति । श्रेष्ठिपद वैश्ये रूढ तदर्थविवक्षयाऽप्यन्वयमर्हति । अथापि तथा विशेषग्रहणे कारणाभावात् श्रेष्ठ्यवन्तमित्यर्थवर्णनम् । ४३

तद्यथा श्रेष्ठीति । अत्र, तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वा श्रेष्ठिन भुञ्जन्ति, एवमेवैष प्रज्ञात्मा एतैरात्मभिर्भुङ्क्ते, एवमेवैत आत्मान एत भुञ्जन्ति' इति श्रीभाष्यपाठ । ४४

स यावद्ध वा इन्द्र एतमात्मानं न विजज्ञौ, तावदेनमसुरा अभिबभूवुः। स यदा विजज्ञौ, अथ हत्वाऽसुरान् विजित्य सर्वेषां देवानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्यैत्।

सर्वान् पाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति, य एवं वेद। य एवं वेद ॥ ४५ ॥

स यावत्...य एवं वेद। इन्द्रो ब्रह्मविद्यालाभात् प्रागसुरैः पीडितः इमां ब्रह्मविद्यां लब्ध्वा असुरहननेन विजयी सर्वदेवाधिपत्यं सर्वदेवश्रैष्ठ्यं **स्वाराज्यशब्दिता**कर्मवश्यत्वलक्षणं च प्राप। अतोऽन्योऽप्येवं वित् सर्वभूताधिपत्यं सर्वभूतश्रैष्ठ्यं पाप्महतिपूर्वकमकर्मवश्यत्वलक्षणं **स्वाराज्यशब्दितं** मोक्षञ्च प्राप्नोतीत्यर्थः।

व्यासार्यैस्तु.... "**सर्वान् पाप्मनोऽपहत्ये**त्यनेनापहतपाप्मत्वादिगुणाष्टकमुक्तम्, जरादीनामपि पाप्मान्तर्गतत्वात्। उक्तं हि वाक्यकारैः, 'सर्वे पाप्मानः कालजरामृत्युशोकादयः सङ्ख्यातत्वात्' इति। **स्वाराज्यम्** स्वाधीनत्वम्। अतः सत्यकामत्वं सत्यसङ्कल्पत्वञ्चोक्तं भवति। अतः (तत् ?) स्वाराज्यं संसारिभ्योऽस्य श्रैष्ठ्यरूपम् **आधिपत्यम्**। **अधिपतिः** परमात्मा, 'सर्वस्याधिपतिः' इति श्रुतेः। तत्संबन्धि **आधिपत्यम्**। गुणाष्टकं हि ब्रह्मसंबन्धितया ब्राह्ममुच्यते, "ब्राह्मेण जैमिनिः" इति। अतो ब्रह्मसंबन्धितया तत्साधर्म्यरूपं संसारिभ्यः श्रेष्ठतारूपं यत् स्वाराज्यम्, तदेतीति श्रुतेरर्थः "इत्युक्तम्। [य एवं वेद।] अन्योऽपि य एतामुपनिषदं वेद, सोऽपि ईदृशं फलमाप्नोतीत्यर्थः ॥ ४५

अन्योऽपि य एतामिति। इदं य एवं वेदेत्यभ्यासस्यार्थवर्णन-

ओं वाङ्मे मनसीति शान्तिः ।

इति ऋग्वेदे कौषीतक्युपनिषदि चतुर्थोऽध्यायः ॥

इति कौषीतकिब्राह्मणोपनिषत् ॥

शुभमस्तु

—:*:—

एतत् प्रकरणं समन्वयाध्याये चतुर्थपादे चिन्तितम् । तत्र हि— 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत् कर्म स वै वेदितव्य.' इत्यत्र [१० १] आदित्यादिपुरुषाणां कर्ता, तत्कर्तृत्वनिर्वाहकञ्च पुण्यपापादिलक्षणं कर्म यस्यास्ति, स वेदितव्य इत्यर्थप्रतीते, कर्मशब्दस्य पुण्यपापयो· रूढत्वात्, सुप्तपुरुषागमनयष्टिघातोत्थापनादीनाञ्च जीवलिङ्गत्वात्, 'तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते' इति वाक्यप्रतिपाद्यभोक्तृत्वपरिपाल्यत्वयोर्जीव एव संभवात् जीव एव प्रकरणप्रतिपाद्य इति प्राप्ते— उच्यते, "जगद्वाचित्वात्" । 'यस्य वैतत्कर्म' इत्यत्र कर्मशब्दस्य यद्यपि पुण्यपापादौ रूढिरस्ति—तथापि चलनेऽपि रूढ्यविशेषेण रूढ्योः परस्परकलहायमानत्वेनार्थनिर्णयासामर्थ्यात्, एतच्छब्दस्य प्रत्यक्षादिसन्निधापितजगत्परत्वौचित्येन तत्समानाधिकृतकर्मशब्दस्यापि, क्रियत इति कर्मेति व्युत्पत्त्या जगद्वचनत्वमेवोचितम् । ततश्चायमर्थ —त्वदु-

---

मिव । अभ्यासस्य समाप्त्यर्थत्वं सर्वत्र प्रसिद्धमिहापि संभवति ।

जगद्वचनत्वमेवोचितमिति । नात्र कर्मपदं जगदित्यर्थकम्; अप्रसिद्धेः । अपितु जगति एतत्पदेनोक्ते तद्गतकार्यत्वमाचि । तथा च भाष्यम् "कृत्स्नस्य जगतः कार्यत्ववाचि" इति । एतच्छब्द एव सर्वे-

कानामादित्यादिपुरुषाणां य कर्ता, अन्नो गत्वा, सर्वमपि जगत् यस्य कार्यम्, स एव वेदितव्य । ततश्च नात्र जीवस्य प्रसक्ति । यदि हि पुण्यापुण्यलक्षणकर्मसंबन्धी जीवोऽत्र वाक्ये प्रतिपाद्यः स्यात्—तदा आदित्यादिषु पुरुषवादिनं बालाकिमब्रह्मवादित्वेन प्रत्याख्यातवता अजातशत्रुणा स्वयमब्रह्मण उपदेश्यत्वासंभवात् [असामञ्जस्यं स्यात् ?]। अतो नाय कर्मशब्द पुण्यपापवचन अपितु जगद्वचन । "जीवमुख्यप्राणलिङ्गान्नेति चेत् तद् व्याख्यातम्" । यष्टिघातोत्थापनभोक्तृत्वादिजीवलिङ्गात्, 'अथास्मिन् प्राण एवैकधा भवति' इति प्राणशब्देन प्राणभृतं निर्दिश्य तत्र करणग्रामस्यैकधाभावश्रवणात्, प्राणभृत्त्वस्य जीव-

---

जगत्परः । तद्गतकार्यत्वं कर्मेत्यनेनोच्यते, सर्वं यस्य कार्यमिति । एवकारेण पुण्यापुण्यपरत्वेऽनौचित्यातिशयो ज्ञाप्यते । तत्पक्षे हि पुरुषाणां कर्तेत्युक्तं कर्तृत्वं जीवे अस्वरसम्—पुरुषसृष्टिसंकल्पाश्रयत्वाभावात्; पुरुषोत्पत्तिपर्यवसायिपुण्यादिकर्मकर्तृत्वस्यैव तत्र सत्त्वात् । तावदर्थविवक्षायां यस्य स्वैतत्कर्मेति पुनरुक्तं स्यात् । यस्य कर्मेत्येवालमिति एतत्पदवैयर्थ्यं च । वाशब्दश्चानन्वितः, चशब्दस्यैव युक्तत्वात् । एवमत्र भाष्ये, 'यद्यपि रूढिरस्ति, तथापि' इति प्रयोगस्वारस्यात् पुण्यापुण्ययोः रूढावप्यनतिसंमतिराविष्क्रियते; चलने रूढेरावश्यकत्वेन प्रकरणाद्यनुरोधेन कर्मत्वेन रूपेण तद्विशेषग्रहणसंभवादिति ।

प्राणशब्देनेति । अत्र प्रकरणे प्राणनामभिरामन्त्रणरूपं प्राणलिङ्गं प्रथममस्ति । पश्चात्, 'प्राण एवैकधा भवति' इति प्राणशब्दश्च । तत्र प्रथमस्य आत्मनि प्राणव्यतिरिक्तताज्ञापनार्थता पूर्वपक्षिणोऽपीष्टा । तेन प्राणव्यतिरेकसिद्धावपि जीवत्वं न सिद्ध्यति । अतो द्वितीय-

लिङ्गत्वाच्च जीव एवात्र प्रतिपाद्यते । न च **प्राण**शब्दस्य मुख्यप्राण एवार्थः, प्राणनामभिरामन्त्रणाश्रवणेन मुख्यप्राणव्यतिरिक्तत्वस्य ज्ञापितत्वेन *मुख्यप्राणस्य एतत्प्रकरणप्रतिपाद्यत्वासम्भवेन* ***प्राण*****शब्दस्य** *प्राणसह* चरितजीवलक्षकत्वस्यैव युक्तत्वात् । ततश्च यद्दृष्ट्यादिजीवलिङ्गात् **प्राण** शब्दसङ्कीर्तनाच्च प्राणभृत् जीव एवात्र प्रतिपाद्यत इति चेत्—तत् व्याख्यातम् । प्रतर्दनविद्यायाम्, 'यत्र प्रकरणे ब्रह्मलिङ्गानि चिदचिल्लिङ्गानि चोपलभ्यन्ते, तत्र चिदचिल्लिङ्गानां चिदचिच्छरीरकान्वयसम्भवात् चेतनाचेतनशरीरकब्रह्मोपासनं विधीयते' इत्युक्तत्वात् । इहानन्यथासिद्धजीवलिङ्गमस्ति चेत् —तच्छरीरकब्रह्मोपासनार्थं तन्मध्यवर्तिजीवोपदेशः । अत्र च प्रकरणे उपक्रम एव, 'मृषा वै मा सवादयिष्ठा ' इति अब्रह्मवादप्रत्याख्यानदर्शनात् पापापहतिपूर्वकस्वाराज्यरूपब्रह्मविद्यैकान्तफलेनोपसंहारात् प्रकरणस्य ब्रह्मपरत्वेन निश्चितत्वात् मध्ये जीवोपदेशस्तच्छरीरकतया ब्रह्मोपासनार्थं इत्यध्यवसीयत इत्यर्थः । "अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके" । यष्टिघातेन जीवसम्बोधनं जीवातिरिक्तब्रह्मप्रतिबोधनार्थमिति जैमिनिराचार्यो

ग्रहणम् । ननु प्राणशब्दस्य जीवलिङ्गत्वेन वर्णनं पूर्वपक्षीष्टं चेत्, 'जीवलिङ्गान्नेति चेत्' इत्येतावदेव वाच्यमिति चेत्—सत्यम् । सूत्रकार, 'जीवमुख्यप्राणलिङ्गान्नेति चेत्—न उपासात्रैविध्यात्' इति प्रयुक्तसूत्रप्रत्यभिज्ञानसम्पत्तिसौकर्याय पूर्वपक्ष्याशय जीवमुख्यप्राणलिङ्गादिति पूर्वोदाहृतप्रयोगेणानुवदतीति मन्तव्यम् । न हि प्राणस्य प्रकरणप्रधानप्रतिपाद्यता सम्भवति, 'तद्यथा रथस्य' इत्याद्युक्तभोक्तृशतमत्वादेरनन्वयात् ।

जैमिनिराचार्यो मन्यत इति । नन्वत्र पूर्वसूत्रे जीवशरीरक-

मन्यते । 'कुत' प्रश्नव्याख्यानाभ्याम् = प्रश्नप्रतिवचनाभ्याम् । यष्टि घातेनापि जीवप्रतिबोधनानन्तरम्, 'क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्वैतदभूत् कुत एतदागात्' इति जीवसुषुप्त्याधारप्रश्नस्य, 'अथास्मिन् प्राण एवैकधा भवति' इति परमात्मवाचिप्राणशब्देन प्रतिवचनदर्शनाच्च जीवातिरिक्तब्रह्मप्रतिबोधनशेषत्वेनैव जीवोपन्यास । न तु तस्यैव शेषितया॥ ननु, 'क्वैतदभूत्' इत्येतच्छब्देन न जीवोऽभिधीयते, येन तत्प्रति पादन परमात्मप्रतिपत्तिशेषभूतं स्यात् । अपि तु एतच्छब्देन करणजातमभिधीयते । एतत् करणजातं सुषुप्तौ क्व लीनम् , प्रबोधदशाया कुत उत्थितमिति प्रश्न –'अथास्मिन् प्राण एवैकधा भवति' इति प्राण शब्दनिर्दिष्टे प्राणभूमि लय इति प्रतिवचनतात्पर्यञ्च किं न स्यादिति चेत्, तत्राह, "अपि चैवमेके"। एके—वाजसनेयशाखिन प्रश्नप्रतिवचनयो जीवसुषुप्त्याधारविषयत्व स्पष्टमामनन्ति । 'य एष विज्ञानमय पुरुष क्वैष तदाभूत्' इति, 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते'इति च । अतो जीवप्रतिपादनस्य परमात्मप्रतिपादनशेषत्वात् परमात्मैवात्र प्रकरणे प्रतिपाद्य , न जीव इति स्थितम् ॥ ४५ ॥

ब्रह्मोपासनार्थं जीवोपदेश इति स्वमत कथयन् सूत्रकारो यदि जैमिनिमत पश्चात् निर्दिशति, तर्हि कतरद्वल ग्राह्यम् । द्वितीयपादे वैश्वानरविद्यायामग्निशरीरकपरमात्मोपासन र्थमग्निशब्द इ युक्त्वा, 'साक्षादप्यविरोध जैमिनि ' इति योगार्थपक्षमुपचिक्षेप । तत्र सूत्रकारपक्षमेवादत्य, जैमिनिमतप्रदर्शन सम्भवदुदाहरणान्तरविषयतत्परिग्रहाभिप्रायेणेति वर्णयाम । न ह्यत्रापि तद्वत् स्थलान्तरे जीवोपदेशस्य जीवव्यतिरेकप्रदर्शनार्थताव्युत्पादनायेह जैमिनि-

मतोक्तिरिति शक्यं वक्तुम् ; 'अपि चैवमेके' इति प्रकृतस्थल एव जैमिनिमतग्राह्यतायामुपष्टम्भकवर्णनात्। अत्र जैमिनिमतमेव तन्मतमिति चेत्, तर्हि पूर्वसूत्रमिदं सूत्रञ्च, 'तद् व्याख्यातम्' इति भागत्यागेन एकसूत्रतया प्रणेतव्यं भवेत् इति चेत्—उच्यते। अत्र पूर्वसूत्रेण जीवमुख्यप्राणोभयविषयेऽपि विशिष्टोपासनपक्ष उक्तः, अनेन सूत्रेण विशिष्टोपासनमुपेक्ष्य जीवादिव्यतिरेकप्रदर्शनार्थस्तदुपदेश इति पक्षान्तरमुच्यते इति केषांचिन्निर्वाहः इह प्रकाशिकायामादृतः। नन्वेवं कतरन्मतं ग्राह्यमिति शङ्का परिहार्येति चेत्—उच्यते। जैमिनिमतमेवेह सूत्रकारस्यापि गूढमभिमतम्। पूर्वसूत्रेण पक्षान्तरकथनञ्च तस्यापि स्थलान्तरे समादरणीयत्वमस्तीति ज्ञापनाय। वैश्वानराधिकरणे जैमिनिपक्षग्रहणं स्थलान्तरे उपयोगाभिप्रायेण ; इह स्वपक्षग्रहणं तदभिप्रायेणेति विशेषः। तेन चेदृशसमाधानस्य प्रागेवोक्ततया पूर्वपक्षः प्रायो नोदियादिति ज्ञाप्यते। तदनन्तरञ्च तादृशं समाधानमिहासंभावितमिति पुनः पूर्वपक्षिशङ्कायां प्रकारान्तरेण समाधानं इदं जैमिनिकण्ठोक्तं प्रदर्श्यते। कथं तदिहासंभावितमिति चेत्—यत्र जीवादौ परमात्मवाचिशब्दसामानाधिकरण्यादिना परमात्मधर्मान्वयप्रतीतिः, तत्र विशिष्टविवक्षा। इह तु, 'क्वैष तदाऽभूत् कुत एतदागात्', 'एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते' इति व्यधिकरणनिर्देश एव लक्ष्यते। अतो विशिष्टोपासनमसंभावितमिति। एवं सूत्रद्वयेन पक्षद्वयनिर्देशश्च अधिकरणसारावल्यामपि दर्शितः—

"इत्थं जीवातिरिक्ते प्रकरणनियते तत्र यज्जीवमुख्य-
प्राणाख्यानं न तेन क्षतिरिह च तथा तद्विशिष्टेष्वुपासा।
प्राणस्य प्राणभाजोऽप्यधिकरणतया वाजिवाक्योक्तरीत्या
ब्रह्मख्यै तदन्यप्रकथनमिति हि स्थापना सार्वभौमी॥" इति।

अत्र श्लोके पूर्वार्धेन विशिष्टोपासनमुक्त्वा तद्विवरणमेवोत्तरार्धेन क्रियते। वाजिवाक्यम् अन्तर्यामिब्राह्मणम्। तृतीयपादे, 'ब्रह्मोच्यते' इति शेषः। तथाच अन्तर्यामिश्रुतिरीत्या इह प्राणजीवविशिष्टतया ब्रह्मोच्यत इति तदर्थः। एवं ब्रह्मशब्दे तदन्यप्रकथनात् प्रतर्दनविद्यायामिवेहापि विशिष्टोपासनसंभवात् एषा स्थापना सार्वभौमीति चिन्तामणिव्याख्यानुसारेणार्थः।

चिन्तामणौ यथावस्थितवाक्यभ्रंशात् तत्रतत्र वाक्यान्तरप्रक्षेपशङ्कया अविश्वसनीयत्वमाशङ्क्य प्रवृत्तायां पदयोजनायां पूर्वार्धे विशिष्टोपासनरूपमेतदधिकरणद्वितीयसूत्रप्रमेयमुच्यते; तृतीयसूत्रप्रमेयमुत्तरार्धे। वाजिवाक्यं तावत् 'अपि चैवमेके' इति सूत्रखण्डविवक्षितं वाक्यम्; न त्वन्तर्यामिब्राह्मणम्। तथाच तत्र प्राणजीवकथनं जीवाधिकरणतया तदन्यभूतं ब्रह्मेति ज्ञापनार्थम्। अयमुत्कृष्टः परिहार इति तदर्थं इत्युक्तम्। तत् सिद्धम् एनमाद्यनुरोधादत्र, 'जीवोपदेशः तच्छरीरकब्रह्मोपासनार्थं इत्यध्यवसीयते' इति वर्ण्यत इति।

अत्रेदं बोध्यम्—श्रीभाष्ये द्वितीयसूत्रस्य जीवविशिष्टब्रह्मोपासनतात्पर्यकत्वं नैव भाषितम्। प्राणशरीरकब्रह्मोपासनमिह प्रकरणे संभवतीति तेन सूत्रेण कथ्यत इति पुनर्भाष्यसूक्तिमापाततः पठन्तः सर्वे संमन्येरन्। वस्तुतः सूक्तिशैलीमवधानैरिदं सुज्ञानम्, यत् द्वितीयसूत्रभाष्यम् "तत्परतया वर्णनीयानीति" इत्यन्तेन समाप्तम्; ततः, "प्रातर्दने हि" इत्यादि "इत्यत्राह" इत्यन्तं तृतीयसूत्रावतरणभूतमिति। अतश्च प्राणशरीरकतया ब्रह्मोपासनमपि न भाष्यकृता द्वितीयसूत्रविवक्षिततया कण्ठोक्तम्। किन्तु तृतीयसूत्रोत्थानोपयोगिशङ्कोन्मुखेन संभवमात्रेणाऽऽविष्कृतमित्येतदेव। जीवविशिष्टोपासनं तु मतराम्। तर्हि द्वितीयसूत्रप्रमेयं किमिति चेत्—न विशिष्टोपासनं वाक्यविवक्षितमिति तत्प्रमेयम्; किन्तु ब्रह्मपरत्वस्य प्रकरणे निश्चितत्वात् जीवादिलिङ्गं श्रूयमाणमपि तच्छेषतया नेय-

मित्येतदेव। तदेव भाषितम्, "तत्परतया वर्णनीयानि" इति। अत्र च श्रुतप्रकाशिका, "न तूपासनार्थत्वमप्यतिदेष्टव्यमिति भावः" इति। अथ च, शेषतया वर्णनं नाम विशिष्टोपासनपरतया वर्णनाच्चाधिकं भवेदिति कृत्वा तस्य प्राणविषये संभवेऽपि जीवविषये असंभवं विमृशता शङ्कायां क्रियमाणायाम् उपासनातिरिक्तप्रकारेण शेषतया वर्णनमुपपादयितुं तृतीयसूत्रमिति।

ननु तर्हि द्वितीयसूत्रे, 'तद् व्याख्यातम्' इति किमर्थम्? तद् विहाय द्वितीयतृतीयसूत्रयोरेकसूत्रतया पठनमेव पर्याप्तम्। न च प्रकृतस्थले प्रकारान्तरेण निर्वाहेऽपि उदाहरणान्तरे विशिष्टोपासनमपि भवतीति ज्ञापनार्थं सूत्रभेद इति वाच्यम्—इन्द्रप्राणाधिकरणे विशिष्टोपासनपक्षस्योक्तत्वात् इह प्रकारान्तरेण निर्वाहे दर्शिते, यत्र यत्संभवः, तत्र तद्ग्रहणमित्यस्य ज्ञायमानतया पृथक्सूत्रवैयर्थ्यात्। अत एव प्राणविषये विशिष्टोपासनसंभवसूचनार्थं पृथक्सूत्रप्रणयनमित्यपि न मन्तव्यम्—इन्द्रप्राणाधिकरणमिदञ्च पश्यतां यथासंभवं तत्तद्ग्रहणस्य स्वतःसिद्धेरिति चेत्—उच्यते। इन्द्रप्राणाधिकरणे, 'उपासात्रैविध्यात्' इत्युपासनपरतया निर्वाहस्य तत्र संभवाभिप्रायेण कथनेऽपि तदधिकरणस्य विशिष्टोपासनेनैव निर्वाहवर्णने न तात्पर्यम्; किन्तु यत्र यथा संभवति तत्र तथा शेषतया निर्वाहवर्णन एवेति ज्ञापनार्थमेव, 'तद् व्याख्यातम्' इति पठित्वा पृथक्कृतम्। अत्र संभवन्निर्वाहप्रकारोपपादनार्थञ्च तृतीयसूत्रम्। 'अन्यार्थं तु' इत्यस्यायमाशयः—प्रकरणस्य जीवपरत्वं शङ्कमानेन यथा तत्र प्राणनामभिरामन्त्रणादेः प्राणलिङ्गस्य प्राणातिरिक्तजीवज्ञापनपरत्वमाश्रयते, तथा ब्रह्मपरत्ववादिना जीवलिङ्गस्य जीवातिरिक्तब्रह्मज्ञापनपरत्वं हि सुवचमिति।

एवञ्च, 'अथास्मिन् प्राण एवैकधा भवति' इति वाक्यम् अस्मिन् इति प्रकरणिनं परमात्मानं ब्रुवत् परमात्मनिष्ठ मुख्यप्राणे एकधाभावपरं वा,

प्राणभृति एकधाभावपरं वा प्राणशरीरके परमात्मनि एकीभावपरं वा, 'प्राणस्य प्राणम्' इत्युक्तरीत्या पुष्कलप्राणनव्यापाराश्रये परमात्मनि एकीभावपरं वेति विमर्शे, अत्र स्वप्नोद्गमनयोरिव सुषुप्तावेकधाभावस्यापि जीवकर्तृकताया एव स्वरसतः, 'यदा सुप्तः स्वप्नं न कथञ्चन पश्यति' इति वाक्यनश्च सिद्धत्वात् करणग्रामस्यैकधाभावो नात्र वर्ण्यत इति जीवकर्तृकएकीभावोऽयं परमात्मन्येवेति निश्चये जाते, प्राणशरीरकपरमात्मपरत्वमप्यौचित्यादुपेक्षितुं युक्तम्। समानप्रकरणे बृहदारण्यके, 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इत्यत्र आकाशशब्दो न हि भूताकाशविशिष्टपरमात्मवाची, भूताकाशे जीवशयनाभावात्। किन्तु आ = समन्तात् काशत इत्युक्तपरमात्मवाची। तद्वदिहापि प्राणशब्दो न मुख्यप्राणविशिष्टवाची;मुख्यप्राणे जीवस्यैकीभावाभावात्। किन्तु प्राणनव्यापारविशिष्टपरमात्मवाचीति पर्यालोचनसंभवात् । अस्मिन् प्राण एवेत्यस्य अस्मिन्नेव प्राणे, न तु मुख्यप्राणे अन्यत्र वेत्यर्थः । प्राणनप्रदे परमात्मनि सुषुप्तत्वादेवायं जागरप्रयासायासपरिहारं लभत इति भावः ।

अस्तु तावदिदं कथमपि । सूत्रभाष्ययोराशयस्तावत् प्रागुक्तो धार्यः। एवं 'तद् व्याख्यातम्'इति इन्द्रप्राणाधिकरणातिदेशकरणात् इदमधिकरणं तदुपरि अधिकाशङ्कया प्रवृत्तमित्यपि सूच्यते। अधिकाशङ्कापरिहारप्रकारौ च श्रुतप्रकाशिकायां दर्शितो, "प्रतर्दनविद्याया-मुपक्रमे जीवलिङ्गावगमः। महावाक्यस्वारस्यं तु परमात्मपरत्वे । इह तूपक्रमोपसंहारमध्येषु जीवलिङ्गावगमात् अत एव परमात्मनः चिदचिद्विशिष्टतापरत्वाभावेनोपासात्रैविध्याप्रतिपत्तेः प्रातर्दनन्यायानवकाश इत्यधिकाशङ्का । त्रिविधोपासनाभावेपि जीवातिरिक्तब्रह्मबोधनरूपप्रयोजनसंभवादस्त्यवकाश इत्यनन्तरसूत्रे विवक्षितोऽधिकः परिहारः" इति । दर्शितभाष्यस्वारस्यश्रुतप्रकाशिकाग्रन्थानुरोधेन च अन्यत् वाक्यजातं नेयम् ।

नन्वेवं विशिष्टोपासनपरत्वं द्वितीयसूत्रे न विवक्षितं चेत्—अधिकरणसारावल्यां तद्वर्णनं कथम्—उच्यते । बहुषु तालकोशेषु अत्र श्लोके द्वितीयः पाद एवं पठ्यते, "प्राणाख्यानं न तेन क्षतिरिह न तथा तद्विशिष्टऽप्युपास्ता" इति । व्याख्यानेऽप्यदृष्टोऽपि बहुतालकोशारक्षितः नञ्घटितः पाठः समुचितो न सहसा प्रतिक्षेपमर्हति । तदयमर्थः—जीवापेक्षयोत्कृष्टे परमात्मनि प्रकरणार्थतया स्थिते सति जीवमुख्यप्राणाख्यानं स्थितमपि न क्षतिकरम् । तावता इन्द्रप्राणाधिकरणोक्तरीत्या जीवविशिष्टोपासनं विवक्षितमिति न मन्तव्यम् । तथा = स्वरूपेणोपासनवत् प्रातर्दनोपासनत्वं तद्विशिष्टेऽप्युपास्ता नेह भवति। किन्तु वाजिवाक्ये आकाशादिपदघटिते जीवस्य ब्रह्माधारकत्वं यथा ज्ञापितम् , तथेहापि प्राणजीवाधारतया ब्रह्मज्ञापनार्थमेव तत्कथनम् । अन्तर्यामिब्राह्मणोक्तरीत्या प्राणजीवाद्याधारतायाः ब्रह्मणि सत्त्वात् तद्रूपेण ब्रह्मज्ञापनार्थमेव प्राणजीवकथनमिति इन्द्रप्राणाधिकरणार्थस्थापना चेत् क्रियते, सा सार्वभौमी हि । प्रतर्दनविद्याभूमाविव वालाकिविद्याभूमावपि सा सुलभमवतरतीति। श्लोके प्राणस्येत्यादि स्थापनेत्यन्तमिन्द्रप्राणाधिकरणार्थस्थापनापरम् । वाजिवाक्यपदं चिन्तामणिग्रन्थ इवान्तर्यामिब्राह्मणपरम् । सार्वभौमीति प्रकृताधिकरणविषयवाक्येऽपि तदतिदेशसंभव उच्यत इति ।

एवञ्च द्वितीयसूत्रस्य विशिष्टोपासनपरतयाऽत्र योजनं यथाश्रुतानुसारिबहुग्रन्थविमर्शं सारावलिश्रुतप्रकाशिकासारस्ये औदासीन्येन सारावलिप्रसिद्धपाठानुसारेण सुखग्राह्यार्थमात्रसंग्रहदृष्ट्येति ॥

सचन्द्रलोकभोगोक्ता मुक्तिः पर्यङ्कविद्यया ।
ऐहिकामुष्मिकश्लिष्टा मुक्तिः प्रातर्दनीगता ॥
केवला मुक्तिरन्ते च प्रोक्ता बालाकिविद्यया ।
मुख्यप्राणस्य साक्षस्य मध्ये वैभवमीरितम् ॥
इत्थमीशाद्युपनिषत्परिष्कारविधायिना ।
वेदान्तलक्ष्मणार्यव्ययोगीन्द्राद्मयज्वसेविना ॥

क्षेमाय य करुणया क्षितिनिर्जराणा भूमावजृम्भयत भाष्यसुधामुदार ।
वामागमाध्वगवदावदतूलवातो रामानुज स मुनिराद्रियता मदुक्तिम् ॥

इति

श्रीमत्तानाचार्यचरणारविन्दचञ्चरीकस्य वात्स्यानन्तार्यपादसेवा-
समधिगतशारीरकमीमासाभाष्यहृदयस्य परकालमुनि
पादसेवासमधिगतपारमहंस्यस्य
श्रीरङ्गरामानुजमुनेः कृतिषु
कौपीतकिब्राह्मणोपनिषत्प्रकाशिका सपूर्णा ॥

श्रीरस्तु ॥

श्रीमते रङ्गरामानुजमहादेशिकाय नम

रङ्गलक्ष्मणयोगीन्द्राल्लब्धवेदान्तसपदा ।
विविधग्रन्थनिर्माणसिद्धसाधुप्रसक्तिना ॥
वीरराघवसज्ञेन वात्स्यसच्चक्रवर्तिना ।
कौपीतकिश्रुतिशिरःपरिष्कार क्रमात् कृत ॥

इति वात्स्यसच्चक्रवर्तिवीरराघवाचार्यकृत
कौपीतक्युपनिषद्भाष्यपरिष्कारः

श्रीमते हयवदनपरब्रह्मणे नम
श्रीरस्तु ॥ शुभमस्तु ॥

शारीरके कौपीतक्युपनिषद्वाक्यस्थलसूची

१—९.	३-१-१२	३—	२-१-२९—३२
१—३७	३-३-२८	४—	१-४-१६—१८
२—१४	३-३ ११		

श्रीः

कौषीतक्युपनिषदर्थसंग्रहकारिकाः

—:-:—

कौषीतकिब्राह्मणोपनिषत् ऋग्वेदसंश्रिता ।
अध्यायेषु चतुर्ष्वत्र प्रथमे प्रतिपाद्यते ॥ १ ॥
पर्यङ्कविद्या यन्निष्ठ इष्टिकृचन्द्रलोकभाक् ।
अनुभूय फलं चन्द्रविसृष्टस्तत्त्वभाषणात् ॥ २ ॥
देवयानेन संप्राप्य ब्रह्मलोकमरं ह्रदम् ।
विरजां चातीत्य पञ्चशत्या चाप्सरसां तदा ॥ ३ ॥
प्रत्युद्गतः सोपहारं दिव्यरूपः परिष्कृतः ।
तिल्यवृक्षादिकं प्राप्य क्रमाद् गन्धादिशोभितः ॥ ४ ॥
द्वारपापद्रवात् आसब्रह्मस्थानोऽमितौजसि ।
पर्यङ्के ब्रह्मणा पृष्टः सत्यवाक् भोगसाम्यभाक् ॥ ५ ॥
मुख्यामुख्यप्राणचिन्ता द्वितीयाध्यायविस्तृता ।
प्रातर्दनी तृतीयेऽन्या परविद्या प्रकीर्तिता ॥ ६ ॥
इन्द्रेण त्वाष्ट्रहत्यादिकर्तृत्वान्तर्गतः परः ।
प्राणस्याप्यन्तरः प्राज्ञः आनन्दश्चाजरामृतः ॥ ७ ॥
सतोऽसतः कारयिता मुक्त्यै तत्रोपदिश्यते ।
तुर्ये बालाकिविद्योक्ता बृहदारण्यके स्थिता ॥ ८ ॥

॥ शुभमस्तु ॥

—:**:—

कौषीतक्युपनिषद्गतानि ऋष्यादिनामानि

चित्रो गार्ग्यायणि	481
आरुणि	,,
श्वेतकेतु गौतमस्य पुत्र	482
अरोह्रद	497-500
मूहूर्ता यष्टिहा	497-501
तिल्यो वृक्ष	497-498
सालज्य सस्थानम्	497
विरजा नदी	497
अपराजितमायतनम्	,,
इन्द्रप्रजापती द्वारगोपौ	498
विभुप्रमितम् (मण्टपम्)	,,
विचक्षणा आसन्दी	,,
प्रिया मानसी	,
प्रतिरूपा चाक्षुषी	,,
अप्सरस	,,
अञ्जनहस्ता	,
मालाहस्ता	,,
चूर्णहस्ता	,,
वासोहस्ता	,,
फणहस्ता	,,
उपथी	505
थी	,,
कौषीतकि	514
पैङ्ग्य	515
प्रतर्दनो दैवोदासि	527
इन्द्र	,,
त्रिशीर्षा त्वाष्ट्र	530
अरुन्मुखा यतय	,,
प्राह्लादय	,,
पौलोमा	,,
कालकञ्जा	,,
गार्ग्यो बालाकि	553
उशीनरा	,,
सत्वमत्स्या	,,
कुरुपाञ्चाला	,,
काशीविदेहा	,
अजातशत्रु काश्य	,,

कौपीतकिब्राह्मणोपनिषद्विषयसूची

पर्यङ्कविद्या		481-514
चित्रेण श्वेतकेतुं प्रति प्रश्नः		481
श्वेतकेतुपितरं प्रति चित्रेण रहस्योपदेशः		483
अनिष्टादिकार्यधिकरणविचारादि	×	483
चन्द्रमोतिपथेन परमपदगमनम्		490-91
तटिदधिकरणम्	×	495-96
वैकुण्ठे ह्रदनदीवृक्षादि		497
पर्यङ्कः प्रियादि च		498
अप्सरःपञ्चशतीप्रेषणम्		499
साम्परायाधिकरणम्	×	501
पर्यङ्कवर्णनम्		505
ब्रह्मप्राप्तिसंवादादि		505-508
अर्चिरादिगतिं विनैव मुक्तिवादिनां परेषां खण्डनम्		509-11
प्राणब्रह्मदृष्टिप्रभेदाः		514-527
इन्द्रियापेक्षया प्राणस्य प्राशस्त्यम्		524-25
प्रतर्दनविद्या		527-552
प्रभाववर्णनम्		529
इन्द्रेण स्वान्तर्याम्युपदेशः		531
प्राणजीवयोरेककार्यकरत्वम्		535
ब्रह्मणश्चित्‌चिदन्तर्यामित्वम्		547
इन्द्रप्राणाधिकरणम्	×	551
बालाकिविद्या		5 3
बालाकिना स्वकृतब्रह्मज्ञानप्रकटनम्		553-61
अजातशत्रुणा तद्गृहीतपुरुषातिरिक्तब्रह्मबोधनम्		562
सुप्तप्रबोधनम्		564-65
सुप्तस्थानतया ब्रह्मबोधनम्		568-69
जगद्वाचित्वाधिकरणम् 571-74 × परिष्कारे		574